२—30. **अवसेस-पुव्वीत्ति**—अवशेषपूर्विणः—अष्ट-सप्ताद्येक-तदर्द्धान्तं यावत् ।

२—31. **निशीथ-कल्प-व्यवहार-दशाश्रुतस्कन्ध-पञ्चकल्प**-प्रभृतिकं शेषं श्रुतं सर्वमपि श्रुतव्यवहारः । तदुक्तम्—'आयारपकप्पाई सेसं सव्वं सुयं विणिद्दिट्ठं' मिति । चतुर्दशादिपूर्वाणां श्रुतत्वाविशेषेऽप्यतीन्द्रियार्थेषु विशिष्टज्ञानहेतुत्वेन सातिशयत्वात् केवलादिवदागमत्वेनैव तानि व्यपदिष्टानि । यत आगम्यन्ते परिच्छिद्यन्ते अतीन्द्रियाः पदार्था अनेनेत्यागम उच्यते ।

२—32. तथा आज्ञायत आदिश्यत इत्याज्ञा । तद्रूपव्यवहारस्तु केनापि शिष्येण निजातिचारालोचकेन आलोचनाचार्यः सन्निहितोऽप्राप्तः, दूरे त्वसौ तिष्ठति । ततः केनचित्कारणेन स्वयं तावत्तत्र गन्तुं न शक्नोति । अगीतार्थस्तु कश्चित्तत्र गन्ता विद्यते । तस्य हस्ते आगमभाषया गूढानि अपराधपदानि लिखित्वा यदा शिष्यं प्रस्थापयति; गुरुरपि तथैव गूढपदौ(दैः)प्रायश्चित्तं लिखित्वा प्रेषयति तदासौ आज्ञालक्षणस्तृतीयो व्यवहारः । तद यु(दु)क्तं 'देसन्तरट्ठियाणं गूढपयालोयणा आणा ।' गूढपदानि च दर्शयिष्यति चूर्णिकृत् । जहा—पढमस्स य कज्जस्सेत्यादिना ॥ **आसेवियसत्थत्थ त्ति**—अभ्यस्तशास्त्रार्थौ ।

२—33. दूरदेशान्तरनिवासिनौ । **मइधारणा-कुसलं त्ति**—सन्दिष्टवस्तुनयनसमर्थम् ।

२—34. गूढार्थैर्वाक्यैः । दर्पासेवनापदमेकम्, अपरं च कल्पासेवनरूपम् । ततः कल्पासेवनद्वितीयपदापेक्षया दर्पासेवनलक्षणं प्रथमं पदम् । तत्रापि दर्पासेवने दशपदानि दर्पाकल्पनिरालम्बनादीनि । तेषु मध्ये प्रथमपदेन दर्पलक्षणेन षट्कानि च त्रीणि । ततः प्रथमषट्कं व्रतषट्कलक्षणम् । अभ्यन्तरतन्मध्यवर्ति तत्र पठितमित्यर्थः । तत्रापि च प्राणातिपातादीनि षट् स्थानानि । तेषु मध्ये प्रथमं स्थानं प्राणातिपातरूपम्, आपन्नमित्येवं गूढपदेन प्राणातिपातातिचारं निर्दिष्टवान् । प्रथमषट्के द्वितीयादिस्थानेष्वतिदिशन्नाह—

२—35. **पढमेत्यादि । सेसेसु वि त्ति**—द्वितीयादिषु मृषावादादिषु स्थानेषु इत्थं वाच्यम् । द्वितीयं षट्कं कायषट्कलक्षणम् । तत्र प्रथमं च स्थानं पृथिवीकायविषयम्, शेषाणि च पदानि अप्कायादीनि । तेषु तृतीयं षट्कं अकल्पगृहभाजनादि-शोभावर्जनपर्यन्तलक्षणम् । तत्र पिण्ड-उपाश्रय-वस्त्र-पात्ररूपं चतुष्टयं यदनेषणीयं तदकल्प्यम् । करोटककंशपात्र्यादिकं च गृहभाजनम् । आसंदकमंचिकादिः पल्यङ्करूपम् । भिक्षां गतेन संयतेन गृहे नोपवेष्टव्यमित्येवं निषद्यावर्जनमुच्यते । स्नानवर्जनं पञ्चमम् । शोभावर्जनं षष्ठमिति । स्वस्थाने न्यक्षेण व्याख्यास्यते गाथेयम् । तत्र प्रथमस्थानमकल्पलक्षणम् ।

२—36. **सेसेसु वि पएसु त्ति**—शेषाणि पदानि गृहभाजनादीनि तेषु । इदानीमतिदेशमाह-प्रथमपदं दर्पलक्षणममुञ्चता तत्रैव यानि अकल्पनिरालम्बनादीनि द्वितीयतृतीयादीनि पदानि निःशङ्कपर्यन्तानि तेषु वाच्यम् । यथा **पढमस्स य कज्जस्सा बिइएण पएण सेवियं जं च** । शेषं पूर्ववत् । ततः **तइएण पएण सेवियं जं** चेत्यादि । यावद् **दसमेण पएण सेवियं जं च** त्ति । इत्येवं प्रथमषट्कमाश्रित्य चारणीयम् । भूयोऽपि द्वितीयषट्कमाश्रित्य तृतीयषट्कं चाश्रित्येत्थमेव चारणीयं यावद्दशमपदमिति । अत एवाह—

३—5. **पुढविकायाइसु त्ति** । अपिशब्दोऽत्र दृश्यस्ततः पृथिवीकायादिष्वपीति दृश्यम् । द्वितीयं च कार्यं कल्पासेवनरूपम् । तत्र चतुर्विंशति पदानि भवन्ति । तेषु मध्ये प्रथमं पदं दर्शनलक्षणं तदर्थमासेवितमित्यर्थः ॥ प्रथमादिपदव्याख्यामाह—**पढमं ठाणमित्यादि**—दर्प-कल्पासेवनेऽधिकृत्य प्रथमं स्थानं दर्पः, दर्पकल्पासेवनाश्रयणेन एतत्साध्यत्वादाकुट्टेरेतयोरेवान्तर्भावः । प्रमादस्य दर्प एवेति न तयोः पृथक् प्रायश्चित्तनिरूपणम् ।

३—9. **परिग्ग[illegible] चेव त्ति** —च शब्दाद्रात्रिभोजनग्रहः । इत्येवं प्रथमषट्कविषयः ।

३—10. **पवमकप्पाईसु वि त्ति**—नवसु पदेषु ।

३—11. द्वितीयं कार्यं कल्पः, कल्पासेवनामाश्रित्य ।

३—12. तत्र ज्ञानादीनि त्रयोविंशति पदानि तेषु मध्ये एकैकस्मिन् पदे; एवमष्टादशसु चतुर्विंशत्या गुणितेषु कल्पासेवनायामेतावन्तो भेदाः—४३२ । उभयासेवनयोर्भेदमीलने ६१२ गाथानां भवन्ति ।

३—14. दुविहा पडिसेवणा-दप्पिया कप्पियेत्यादि—दप्पाईणि दसपयाणि वक्खाणेइ—

३—17. तत्थ दप्पो—धावणडेवणाई—इत्यादि । अमीषामयमर्थः—धावण त्ति निःकारणेण खडयप्पयाणं धावणं । डेवणं गत्तवरंडाईफडणं । आदिशब्दात् मल्लवत् बाहुजुद्धकरणं, लगुडिभमाडणं ॥ १ ॥

अकप्पो नाम पुढवाइकायाणं अपरिणयाणं गहणं करेइ । अहवा उदउल्ल-ससणिद्ध-ससरक्खाइएहिं हत्थमत्तेहिं गिण्हइ । जं वा अगीयत्थेणं आहारोवहि उप्पाइयं तं परिभुंजंतस्स अकप्पो । पञ्चकादिप्रायश्चित्तशुद्धियोग्यमपवाद-सेवनविधिं त्यक्त्वा गुरुतरदोषसेवनं वा अकप्पो ॥ २ ॥

निरालम्बो ज्ञानाद्यालम्बनं विना नाणाईणि अवलंबिउं अकप्पियं पडिसेवइ सालम्बा; नाणाइ अवलम्बनं त्यक्त्वा अकारणेण पडिसेवइ जं सा निरालम्बा ॥ ३ ॥

३—18. चियत्त त्ति—त्यक्तं कृत्यं करणीयं येन स त्यक्तकृत्यः, त्यक्तचारित्रः । अयमर्थः—जं अववायेण निसेवियं गिलाणाइकारणे असंथरे वा, पुणो ते चेव हट्ठसमत्थो वि होउ (उं) निसेवंतो चियत्तकिच्चो भवइ ॥ ४ ॥

अप्पसत्थे त्ति—बलवर्णाद्यर्थं प्रासुकभोज्यपि जं पडिसेवइ सा अप्रशस्तपडिसेवणा, किं पुण अविसुद्धं आहाकम्माइं ॥ ५ ॥

३—19. वीसत्थे त्ति—अकिच्चं पाणाइवायाइ सेवंतो लोय-लोउत्तरविरुद्धं सपक्ख-परपक्खाउ अलज्जिरो वीसत्थो । सपक्खो सावगाइ; परपक्खो मिथ्यादृष्टयः ॥ ६ ॥

अपरिच्छिय त्ति—आयव्ययमपरीक्ष्य यः प्रवर्ततेऽपवादे । आयो लाभो, व्ययो लब्धस्य प्रणाशः; एसा अपरिच्छियपडिसेवणा ॥ ७ ॥

३—20. अकडजोगि त्ति । जोगमकाऊण त्ति—ग्लानादौ कार्ये गृहेषु वारत्रयपर्यटनमकृत्वा सेवते । यद्वा संथाराइसु तिन्नि वारा एसणीयं अन्निसिउं जया तइयवाराए वि न लब्भइ तया चउत्थपरिवाडीए अणेसणीयं घेत्तव्वं । एवं तिगुणं व्यापारमक्ष(कृ)त्वैव जा वियवाराए चेव अणेसणीयं गिण्हइ सोऽकडजोगी ॥ ८ ॥

निरणुतावि त्ति—जो साहू अववाएणावि पुढवाईणं संघट्टण-परियावण-उद्दवणं वा काउं पच्छा नाणुतप्पइ—'हा दुट्ठु कयं' सो अणणुतावी होइ-अपच्छायावीत्यर्थः । जो दप्पेणं पडिसेवेन्तो नानुतप्येत्तस्य विशेषः ॥ ९ ॥

३—21. णिस्संको त्ति—निरपेक्षः । अकार्यं कुर्वन् कस्याप्याचार्यादेर्न शङ्कते, नेहलोकस्यापि बिभेति ॥१०॥

३—23. दंसणाईणि चउवीसपयाणि, एएसिं इमं वक्खाणं—**दंसण त्ति**—दंसणपभावगाणि सत्थाणि **सिद्धि-विणिच्छय-सम्मत्यादि** गिण्हन्तोऽसंथरमाणो जं अकप्पियं पडिसेवइ जयणाए तत्थ, सो सुद्धोऽप्रायश्चित्त इत्यर्थः ॥

नाण त्ति—नाणनिमित्तं सुत्तं अत्थं वा गेण्हमाणो तत्थ वि असंथरे अकप्पियं पडिसेवंतो सुद्धो ॥

चरित्ते त्ति—जत्थ क्खेत्ते एसणदोसो, ताओ खेत्ताओ चारित्रार्थिना निर्गन्तव्यम् । तओ निग्गच्छमाणो जं अकप्पियं सेवइ तत्थ सुद्धो ॥

तव त्ति—तवं काहामि त्ति घयाइ नेहंऽतिपिवेज्ज, कए वा विगिट्ठतवे पारणे लायातरणाई पियेज्जा । लाया नाम वीहिया भुज्जिया भट्टे ताण तंदुलेसु पेया कज्जइ तं लायातरणं भन्नइ तं, विगिट्ठतवपारणए अहवा आहाकम्मं पि देज्जा । मा अन्नेण दोसीणाइणा रोगो हवेज्जा । पारणगे आमलगसर्करादयो वा दीयन्ते । जयणाए सुद्धो । अतोऽग्रे **संजमे**ति पदं दृश्यते चूर्णिपुस्तकेषु परं तदशुद्धम् । तस्य स्थाने **पवयण त्ति** पदं पठनीयम् । **निशीथे** एतदीय-भाष्ये च इत्थमेव पठितत्वात्; चारित्रपदेनैव संयमार्थस्योक्तत्वाच्च । अतः पवयण त्ति व्याख्यायते—**पवयणट्ठयाए किंचि पडिसेवंतो सुद्धो** । जहा कोई रायाइ भणेज्जा 'मम विसयाओ नीह [र]' । एत्थ **पवयणट्ठया सेवंतो सुद्धो । जह विट्ठअणगारो** । तेण रुसिएण लक्खजोयणपमाणं रूवं विगुव्वियं लवणो चलणेणालोडिओ त्ति ॥

समिय त्ति—इरियं न सोहेहस्सामि त्ति चक्खुर्निमित्तं वैद्योपदेशादोषधपानं कुर्यात् । इरियासमिइनिमित्तं ।

खेत्तचित्ताईओ होउं मा भासासमिएऽसमिओ होमि त्ति तप्पसमणट्ठया ओसहपाणं कुर्यात् । तइयाए समिईए अणेसणियं पि कयाइ गिण्हेज्जा । एसणदोसेसु वा दससु संकाइएसु गिण्हेज्जा । अद्धाणपडिवन्नो वा अद्धाणकप्पं पडिसेवेज्जा । आयाणनिक्खेवणसमिईए चलहत्थो होउं कंपणवाउणा गहिओ सो अन्नओ पमज्जइ अण्णओ निक्खेवं करेइ; तप्पसमणट्ठया वा ओसहं करेज्जा । पारिट्ठावणियसमिईए कायभूमीए वा किंचि विराहेज्जा ।

मणोगुत्तीए वियडं कारणओ पडिसेवियं तव्वसा मणसाऽगुत्तो कारणागुत्तो खेत्तचित्ताइ हवेज्जा ।

'साहम्मियवच्छल्लाइ-बालवुड्ढपज्जवसाणाण' नवण्हं पयाणं व्याख्या । साहम्मियवच्छल्लं पडुच्च किंचि अकप्पं पडिसेवेज्ज । जहा **अज्जवयरेहिं** असिवगमुंडो नित्थरिओ । तत्थ किं अकप्पं? भन्नइ—

तहे वा संजयं धीरो आसएहिं करेहिं वा । सयं चिट्ठ वयाहि त्ति नेवं भासिज्ज पन्नवं—इति ॥

सिलोगो कण्ठ्यः । कुल-गण-संघकज्जेसु समुप्पन्नेसु वसीकरण-उच्चाटण-होमाइ रायाइयमुद्दिस्स पउंजेयव्वं । निमित्त-चुन्न-जोगा कायव्वा । आचार्यस्य असहिष्णोर्गिलाणस्स बालवुड्ढाण य जेण समाही तं कायव्वं । को य असहू? तत्थ राया जुवराया सेट्ठि-अमच्च-पुरोहिया य एए असहू पुरिसा भन्नंति । एए अन्तपन्ताइएहिं अभाविया । बालवुड्ढा य कारणे दिक्खिया होज्जा;—जहा **वयरसामी, अज्जरक्खिय**-पिया य । एएसिं पणगाइयाए जयणाए घेत्तुं समाहिहेउं दायव्वं । जयणाए अलब्भमाणे पच्छा जाव आहाकम्मेणावि समाहाणं कायव्वं ।

३—25. इयाणिं **उदयाइ-वसणपज्जवसाणाणं** अट्ठण्हं पयाणं व्याख्या उच्यते । तत्थ **उदय त्ति**—वाहो पानीयप्लव इत्यर्थः । **अग्गि त्ति**—दवाग्निरागच्छति । [**चोर त्ति**—]चोरा दुविहा उवगरणसरीराणं । **सावय त्ति**—गय-सप्प-सीह-वग्घाइ । **भय त्ति**—एयसयासाओ भयं । एएसिं अन्नयरकारणे उप्पन्ने थंभणिविज्जं मंतेऊण थंभेज्जा । विज्जाभावे पलायइ । पलाइउं असमत्थो श्रान्तो वा सच्चित्तरुक्खं दुरुहेज्जा, न दोसो । [**कंतार त्ति**—]कन्तारमध्वानं जत्थ भत्तपाणं न लब्भइ तत्थ जयणाए कयलगाई फलं वा उदगाई वा फासुयं गिण्हेज्जा । अडवी ४; दव्व-खेत्त-काल-भावावई चउहा । दव्वओ फासुयं दव्वं न लहइ । खेत्तओ अद्धाणपडिवन्नयाण आवई । कालओ दुभिक्खाइसु । भावओ गिलाणस्स आवई । तत्थ किंचि अकप्पियं पडिसेवेज्जा । तत्थ विसुद्धो । **गीयाइ**-अब्भासो व[सी?]णं । कोई चारणाइदिक्खिओ वसणत्तो गीओचारं करेज्ज । पुव्वभाविओ पक्कताम्बूलपत्ताइ **मुहे** पक्खिवेज्ज । एसा दंसणाइया कप्पिया । एत्थ पडिसेवओ साहू, दप्पिया-कप्पियाइ पडिसेवणा, पडिसेवियव्वं च वयछक्काईणि अट्ठारसट्ठाणाणि । तत्थ य—

३—28. **वयछक्क-कायछक्कं०** गाहा । व्याख्याः—व्रतषट्कं प्राणातिपातादिपञ्चकरात्रीभोजनविरतिषट्कम् । पृथिव्यादयः षड्जीवनिकायाः । षट्कद्वयेन मूलगुणा उक्ताः । अथैतद्वृत्तिकल्पा अकल्प्यादयः षडुत्तरगुणा अभिधीयन्ते । तत्राकल्पो द्विविधः—शिक्षकस्थापनाकल्पः, अकल्प्यस्थापनाकल्पश्च । तत्राद्यः—अनधीतपिण्डनिर्युक्त्यादिशास्त्रसाधुना आनीतमाहारादि साधुभ्यो न कल्पते । उक्तं च—

अणहीया खलु जेणं, पिंडेसण १ सेज्ज २ वत्थ ३ पाएसा ४ । तेणाणिआणि जइणो कप्पंति न पिंडमाईणि ॥१॥

उउबद्धम्मि न अनला, वासावासे उ दोवि नो सेहा । दिक्खिज्जंती सेहट्ठवणा कप्पो इमो नवरं ॥ २ ॥

'दोवि त्ति'—नपुंसकाऽनपुंसकाख्यं द्वयं वर्षासु न दीक्ष्यते । शीतोष्णाख्यशेषमासाष्टके अनला नपुंसका न दीक्षार्हाः इति । [**अकप्पो**—] शिक्षकस्थापनाकल्पोऽकल्प्यः । अन्यश्च पिण्डशय्यावस्त्रपात्रानेषणीयचतुष्टयगोचरोऽकल्प्यः । उद्गमोत्पादनादिदोषरहितं च चतुष्कं कल्प्यम् । [**गिहिभायणं**—] गृहभाजनं गृहस्थसम्बन्धिकांस्यकरोटकतलिकामृन्मयकुण्डिकादिकमकल्प्यम् । **पलियंक त्ति**—आसन्दकशय्यामञ्चकादिके उपवेशनशयनीयरूपे सुषिरदोषान्न कल्पते उपवेष्टुं स्वप्तुं वा । **निसेज्ज त्ति**—भिक्षार्थं गृहे प्रविष्टस्य साधोस्तत्र निषदनं कर्तुं न कल्पते उत्सर्गतः; अपवादतस्तु साधुत्रयमध्ये अन्यतरस्य कल्पते जराभिभूतस्य व्याधिमतो विकृष्टक्षपकस्य च तपस्विन इति । एते च भिक्षाटनं न कार्यन्त एव । परमात्मलब्धिकायपेक्षया सूत्रे त्रयस्योपवेशनं योज्यम् । [**सिणाणं त्ति**—] स्नानमङ्गप्रक्षालनं देशसर्वभेदभिन्नम् । [**सोभवज्जणं**—]शोभावर्जनं विभूषापरित्यागः । इत्यष्टादशस्थानगणः प्रतिषेवयितव्य आलोचनागोचरः ।

३—30. **सोऊण०** गाहा । तस्य गुरोः प्रतिसेवकस्य । स शिष्यः गूढपदावधारकः ।

सोऊण त्ति—श्रुत्वा; प्रतिसेवनां आलोचनां च श्रुत्वा, क्रमविधिं च श्रुत्वा मूलोत्तरगुणविषयाम्। आगमं ज्ञात्वा, पुरुषजातं च आचार्यादि ज्ञात्वा। तदीयं पर्यायं व्रतवयोविषयम्, बलं च शरीरसामर्थ्यम्, क्षेत्रं च कर्कश-साधारणादिरूपं ज्ञात्वा। यस्मादागतस्तत्रैव गतः। अमुमेवार्थं प्रकटयति अवधारेउमित्यादिना।

३—31. **सो तउ त्ति**—स तकः गूढपदालोचनाकथकः। **सो०** गाहा। स आलोचना-दाता स्वयं गन्तुम-समर्थः स्वशिष्यं प्रेषयति; तदभावे आगतशिष्यस्यैव कथयतीति तात्पर्यम्।

३—32. **अणुमज्जिय त्ति**—निरूप्य विशोध्येत्यर्थः। **तं ति**—गूढपदालोचितमतिचारम्। तस्य गुरोः। **पच्छित्तं ति**—तपोदानरूपं ददाति, गूढपदैरेषां कथयति। तान्येव दर्शयति **पढमस्स ये**त्यादिना—

३—33. प्रथमस्येति दर्पासेवनारूपस्य। [**दसविहमालोयणं ति**—] दशविधालोचना दर्प–अकल्पादि-दशपदात्मिका, तां विमृश्य, गूढपदौ प्रायश्चित्तं पाठयति। **नक्खत्तेमे पील त्ति**—अस्यार्थः-भे भवतां पीडा विराधना; नक्षत्रे कोऽर्थः-चन्द्रादित्यग्रहनक्षत्रतारकभेदतः पञ्चविधज्योतिश्चक्रमध्ये नक्षत्रभेदश्चतुर्थस्थानी। अतस्तेन चतुर्थव्रतगोचरा पीडा सूच्यते—इत्येके व्याचक्षते। अत्रैव—नक्खत्तमेगे मूलं भणंति, अन्ने हत्थं निद्दिसंति; अवरे मूलुत्तरगुणविराहण त्ति। तत्थ चउत्थ (०त्थतं b) इयव्वयविराहणाइयारे हत्थं ति हत्थकम्मं कयं। हत्थेण अदिन्नं वा गहियं। यद्वा व्रतषट्कादयः सप्तविंशतिसंख्या अनगारगुणा मूलोत्तरगुणरूपा नक्षत्रशब्देनात्राभिप्रेताः, नक्षत्राणामप्येतत्संख्याव्यवहारात्। तथा च अनगारगुणानाश्रित्य पठ्यते—'सत्तावीसाए अनगारगुणेहिं ति'। तत्र—

वयछक्कमिंदियाणं च निग्गहो भावकरणसच्चं च। खमया विरागया वि य मणसाईणं निरोहो य॥
कायाण छक्कजोगम्मि जुत्तया वेयणाहियासणया। तह मारणंतियाहियासणा एए अणगारगुणा॥

इह व्रतषट्कं मूलगुणाः। कायषट्कं चेति द्वादश शेषाः (?)। तत्र मूलगुणे चतुर्थव्रतविषये पढमे छक्के चउत्थं भवेट्ठाणमिति गाथापाठो द्रष्टव्यः। उत्तरगुणविराधनामाश्रित्य **सुक्के मासे तवं कुणह त्ति** भणितं; चउमासं छमासं च तवं कुणह सुक्क इत्यप्यग्रतो भणितम्। परं शुक्रमासादिदानपक्षे उत्तरगुणानाश्रित्य द्रष्टव्यम्। कृष्णमासादि दानपक्षे मूलगुणविराधनामाश्रित्येति। नवरं उग्घाओ सुक्कमासो सड्ढसत्तावीसं दिवसनिष्पन्नो। अणुग्घाओ पडिपुन्नो तीसअहोरत्तनिष्पन्नो॥

४—2. **एवं ता उग्घाए[इ]**त्यादि—तत्र उद्घातो भागपातस्तेन निर्वृत्तं उद्घातिमं लघ्वित्यर्थः। एतन्निषेधा-दनुद्घातिमं गुर्वित्यर्थः। तत्र प्रथमं पञ्चकं, दशकं, पञ्चदशकं, विंशतिमं, पञ्चविंशतिमं, इत्येतत्सर्वं भिन्नमासशब्द-वाच्यं ज्ञेयम्। मासलघु, मासगुरु, चउलघु, चउगुरु, छलहु, छगुरु। अन्यच्च द्विमासगुरु, त्रिमासगुरु, चउमासगुरु, पञ्चमासगुरु, छमासगुरु—एते सम्पूर्ण-निजनिजपरिमाणाः कृष्णमासशब्दवाच्याः, अनुद्घाताश्चोच्यन्ते। तत्र लघुगुरुदानेऽयं क्रमः—

अद्धेण च्छिन्नसेसं पुव्वद्धेणं तु संजुयं काउं। देज्जाहि लहुयदाणं, गुरुदाणं तत्तियं चेव॥

यथा-मासस्यार्द्धच्छिन्नस्य शेषदिन १५। एतन् मासापेक्षया पूर्वस्य पञ्चविंशतिकस्यार्द्धे सार्धद्वादशकेन संयुतं कृतं मासार्द्धं सार्धसप्तविंशतिर्भवति। इत्येवं दिनसंख्यानिष्पन्नः शुक्रमासः, उत्तरगुणविराधनामाश्रित्य वाच्यः। शुक्रचतु-र्मासः प्राचीनप्रक्रियया कृतः। एतावान् ११० भवति। शुक्रषण्मासिकं तपः १६५।

अणुघाए ताणि त्ति—तानि मासिकादीनि षण्मासान्तानि तपांसि अणुग्घाए त्ति सम्पूर्णानि कृष्णशब्द-वाच्यादीनि द्रष्टव्यानि। तत्र गुरुमासिकं गुरुद्विमासत्रिमासचातुर्मासिकं पञ्चमासिकं षण्मासिकम्।

गु० मा० ३०	गु० द्विमा० ६०	गु० त्रि० ००	गु० चा० ०००	गु० पं० ००००	गु० ष० ०००००
ल० मा० २७॥	ल० ,, ४५	ल० ,, ७५	ल० ,, १०५	ल० ,, १३५	ल० ,, १६५.

अन्यच्चोच्यते किञ्चित्-अट्ठमाइणा तवेण जं बुज्झइ तं तवगुरुयं, निव्वीयाइणा छट्ठंतेण बुज्झमाणं तवलहुगं, कालओ जं गिम्हे बुज्झइ तं काललहुयं। अन्यच्च—

जं तु निरंतरदाणं जस्स व तस्स व तवस्स तं गुरुयं। जं पुण संतरदाणं गरुयं पि हु तं लहुं होइ॥
तवकाले आसन्न व गुरू वि होइ लहू लहू गुरूओ। कालो गिम्हो गुरु अट्ठाइतवो लहू सेसो॥

इह तीर्थे उत्कृष्टतोऽपि षण्मासान्तमेवातिचारशुद्ध्यर्थं तपो भवति । अत उक्तं—मास-चउमास-छमासियाणि । इत ऊर्ध्वं च षण्मासिकेनाप्यशुद्धौ छेदमूलानवस्थाप्यपाराञ्चिकानि तत्तत्कालापेक्षया सूरिभिर्दीयन्ते । अतश्चूर्णिकृदाज्ञाव्यवहारे कृते गूढपदैरेव तानि वक्तुकाम इदमाह—**छेअं अओ वोच्छं ति । अओ त्ति**—षण्मासीए तपस ऊर्ध्वं छेदादिप्रायश्चित्तं गूढपदैराज्ञाव्यवहारत्वाद्वक्ष्ये । अन्यत्राप्युक्तम्—

'उस्सग्गेण वि सुज्झइ अइयारो कोइ, कोइ उ तवेण । तेण उ असुज्झमाणे छेयविसेसा विसोहिंति त्ति' ॥ तत्र—

४—3. छिंदं तु तयं भाणं ति॰ गाहा । अस्यायमर्थः—तयं तु तकत्, भाणं ति पूर्वव्रतपर्यायरूपं भाजनम्, छिन्दन्तु अपनयन्तु उत्सारयन्तु । पर्यायच्छेदं तु अतिचारानाश्रित्य 'छब्भागंगुलपणए' इत्यादिना वक्ष्यति । पूर्वपर्यायच्छेदेनाशुद्ध्यमाने साधवो व्रतस्य पर्यायस्य मूलं व्रजन्तु । अष्टमप्रायश्चित्तभाजो भवन्तु । तस्याप्ययोग्यतायां 'अव्वावडावगच्छे'—व्रजेयुरव्यापृताः, अव्यापाराः संतिष्ठन्तु, अनवस्थाप्याहाः भवन्तु । तेनाप्यशुद्धौ तदयोग्यतायां 'अबिइया वावि' विहरन्तु । अद्वितीया एकाकिनः सन्तो वक्ष्यमाणपाराञ्चिकप्रायश्चित्तासेविनो भवन्तु । प्रागुपात्तं छेदं दर्शयति—

४—4. छब्भागंगुलेत्यादिना । छेदो हि पञ्चकदशकादिरूपतया तत्तदतिचारापेक्षया तपोभूमिमपक्रान्तस्य यावत्पर्यायधरणं तावद्भवति । यदाह—

'उक्कोसं तवभूमिं समईओ सावसेस-चरणो य । छेयं पणगाईयं पावइ जा धरइ परियाओ ॥'

गाथाद्वयस्यार्थः कथ्यते-**छब्भागंगुलपणगे त्ति**—सो आलोयणायरिओ, तस्स सीसस्स एयाए सन्नागूढं छेयपायच्छित्तं देइ । तं जहा—मास दुमास तिमास चउम्मास पंचमास छम्मासाणं पत्तेयं पत्तेयं अंगुलववएसं करेइ । तहा कए य जस्स मासमेत्तो परियाओ तस्स, पंचगे त्ति पंचसु दिवसेसु छिंदियव्वेसु, अंगुल त्ति मासस्स छब्भागो छिंदियव्वो त्ति भणियं होइ । **दसभाए ति भाग त्ति**—तस्सेव य अंगुलसन्नियस्स मासस्स दससु दिणेसु छिंदियव्वेसु अंगुलस्स तिभागो छिंदियव्वो त्ति भणइ । मासपज्जायस्स दसदिवसा छिंदियव्व त्ति भणियं होइ । **अद्ध-पन्नरसे त्ति**—तस्सेवांगुलसन्नियस्स मासस्स पन्नरसे त्ति पन्नरससु दिवसेसु छिंदियव्वेसु अद्धमंगुलस्स छिंदियव्वं ति निद्दिसइ । पन्नरस दिवसाणि छिंदियव्वाणि त्ति सब्भावो । **वीसाए तिभागूणं ति**—तस्सेव मासस्स वीसाए दिवसाणं छिंदियव्वाए तमेवंगुलं ति-भागूणं ति तइयभागेण ऊणं छिंदियव्वं ति भण्णइ । मासस्स दोन्नि भागा अवरा य त्ति भणियं होइ । **छब्भागूणं तु पणवीसे त्ति**—तस्सेव मासस्स पंचवीसाए दिवसाणं छिंदियव्वाए छब्भागूणं ति तमेवांगुलं छब्भागेण ऊणं छिंदियव्वं ति भणइ । मासस्स पंचवीसं दिवसा छिंदियव्वं ति । मासे छिंदियव्वे अंगुलं छिंदियव्वं ति भणइ ॥ १ ॥ बिहिं मासेहिं छिंदियव्वेहि अंगुलदुगं छिंदियव्वं ति भणइ ॥ २ ॥ ति मासे छिंदियव्वे अंगुलतिगं छिंदियव्वं ति भणइ ॥३॥ चउमासे छिंदियव्वे चउरो अंगुलाइं छिंदियव्वाइं भणइ ॥ ४ ॥ पंचहिं मासेहिं छिंदियव्वेहिं अंगुलपंचगं छिंदियव्वं ति सन्दिसइ ॥ ५ ॥ छम्मासपरियाए छिन्दियव्वे छअंगुलाइं ववइसइ ॥ ६ ॥

४—5. एए छेयविभाग त्ति—एए त्ति पुव्वनिद्दिट्ठा, छेय त्ति छेयं सत्तमपायच्छित्तं तस्स विभागा विसेसा नायव्वा—जाणियव्वा । **अहक्कमेणं तु** त्ति जे जहा निद्दिट्ठा ।

आज्ञाव्यवहारे दर्पिकीमासेवामभिधायाधुना कल्पिकीमाह—

४—6. बिइअस्स कज्जस्सेत्यादिना । द्वितीयस्य कल्पासेवनारूपस्य ज्ञानदर्शनादिचतुर्विंशतिषड्रूपस्य तद्गोचरामासेवनां श्रुत्वा शिष्येण कथ्यमानां सूरिर्ब्रूते—**आउत्तनमोक्कार त्ति** । आयुक्ताः संयमोद्यमविधायिनः पञ्चपरमेष्ठिस्मरणपरा भवंतु सूरयोऽप्रायश्चित्तिन इति भावः । नवरं—कारणपडिसेवा वि हु सावज्जा निच्छये अकरणिज्जा, किं सर्वथा नेत्याह—बहुसो वियाइत्ता । कर्तव्यमिति शेषः । अधारणिज्जेसु—अत्यागाढकारणेष्वित्यर्थः । "जइ वि य समणुन्नाया—सावद्यप्रतिषेवेति प्रक्रमः—तहवि य दोसो न वज्जणे दिट्ठो । दढधम्मया हु एवं नाभिक्खनिसेव-निद्दयया ॥"

४—8. एवं सो इत्यादि । द्रव्यादिकं ज्ञात्वा परिभाव्य वेति शेषः । परिपृच्छ्य स्वकीयगणं स्वयमात्मगमनं विषये, शोधिदाता सूरिः गीतार्थशिष्यं वा प्रेषयति । **अविज्जमाणे च त्ति** निजगमन-स्वशिष्याभावे । **तस्सेव त्ति** आलोचनातिचारकथकप्रेषितशिष्यस्यैव हस्ते गूढपदैरक्षरैः(रै ?)र्लिखित्वा वा विशोधिं प्रेषयति ।

४—10. धारणाव्यवहारस्तु—

'गीयत्थेणं दिण्णं सुद्धिं अवधारिऊण तह चेव । दिंतस्स धारणा सा उट्ठियए य धरणरूवा जा ॥' सुगमा ।

४—13. बहुसो पडितप्पियस्स त्ति—अनेकशः कृतकार्यस्य । **अवसेस त्ति**—किञ्चिच्छेषाकर्णितागमस्य । अयमर्थः—वैयावृत्त्यकरणादिना गच्छोपकारी कश्चित्साधुरद्याप्यशेषच्छेदश्रुतयोग्यो न भवति ततस्तस्यानुग्रहं कृत्वा यदा गुरुरुद्धृतान्येव कानिचित् प्रायश्चित्तपदानि कथयति तदा तस्य तेषां पदानां धरणं धारणा अभिधीयते ।

४—15. जीतव्यवहारस्तु येष्वपराधेषु पूर्वमहर्षयो बहुना तपःप्रकारेण शुद्धिं कृतवन्तस्तेष्वपराधेषु साम्प्रतं द्रव्यक्षेत्रकालभावान् विचिन्त्य संहननादीनां च हानिमासाद्य समुचितेन केनचित्तपःप्रकारेण यां गीतार्थाः शुद्धिं निर्दिशन्ति तत्समयपरिभाषया जीतमित्युच्यते । अथवा यद्यत्र गच्छे सूत्रातिरिक्तं कारणतः प्रायश्चित्तं वर्तितमन्यैश्च बहुभिरनुवर्तितं तत्तत्र रूढं जीतमुच्यते ।

४—19. वत्तणु० गाहा ।—

वत्तो नामं एक्कंसि अणुवत्तो जो पुणो बिइयवारे । तइयवारं पवत्तो सुपरिग्गहिओ महाणेणं ॥
बहुसो बहुस्सुएहिं जो वत्तो न य निवारिओ होइ । वत्तणुवत्तपमाणं जीएण कयं हवइ एयं ॥

तथा च—सो जह काईएणं अपडिक्कंतस्स निव्विगइयं तु । मुहणंतफिडियपाणग-असंवरे ए[व]माईसु ॥
एगं दिणं च वज्जे घट्टणतावेण गाढगाढे य । णिव्विगईमाईयं जा आयामंतमोद्दवणे ॥
विगलिंदणंतघट्टणपरियावणगाढगाढउद्दवणे । पुरिमड्ढाइ कमेण उ नेयव्वं जाव खमणं तु ॥
पंचिंदि-घट्टतावण-अणगाढगाढ-तहेव उद्दवणे । एगासणमायामं खमणं तह पंचकल्लाणं ॥
एमाईओ एसो नायव्वो होइ जीयववहारो । अणवज्जविसोहीकरो संविग्गगणगारविन्नो त्ति ॥

४—25. आगमव्यवहार(रा) न श्रुतमनुवर्तयन्ति । **जे पुणोत्यादि**—

'आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च । नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः ॥' इत्यन्यत्रापि पठ्यते । नवरम्—इङ्गितं निपुणमतिगम्यं प्रवृत्तिनिवृत्तिसूचकमीषद्भ्रूशिरःकम्पादि । आकारः स्थूलधीसंवेद्यः प्रस्थानादिभावसूचको दिगवलोकनादिः ।

४—26. वत्ति त्ति—वक्त्रम् । **[णेत्तं]**—नेत्रं लोचनम् । **वयण त्ति**—वचनम् । एतदीयविकारादिभिः । **तिक्खुत्तो त्ति** त्रिकृत्वो वेलात्रयं संवादार्थम् । पलिउंचियं समायं, अपलिउंचियं अमायं ।

४—28. सुयाभावे त्ति—श्रुतवत्सन्निधानाभावे ।

४—29. सुयववहाराणुसरिसो त्ति—यतः श्रुतोक्तप्रायश्चित्तमेवात्रापि दीयते ।

४—31. विसेसिउ त्ति—आज्ञाव्यवहारः श्रुतोपदेशोचितप्रदानम् ।

४—32. सव्वत्थय त्ति—त्रिषु कालेषु, जीतस्य चिरानुवर्तनं यावत्तीर्थं तावत् ।

५—4. तवेगदेसं ति—द्वादशभेदस्य तपसः प्रायश्चित्तं तदेकदेश एव ।

५—5. पारंपरिएण—परम्परया । **उव्वेल्लणाए-परमसमसुह०**—सम्यक्सुखलक्षणः ।

५—9. अनादानं अग्रहणं नूतनकर्मणः ।

५—10. अहव त्ति—यद्वा संवरनिर्जरे एते सप्रभेदे कथ्येते—विशिष्टं लक्षणमेतयोर्भण्यत इति भावः । मिथ्यात्वाविरतिकषायप्रमादयोगानां निरोधः [संवरः] ।

५—11. अवरोधेन अपगमेन ।

५—13. इन्द्रियाणि पञ्च, तेषां विषयाः शब्दरूपरसस्पर्शगन्धाख्यास्तेषु इष्टानिष्टेषु रागद्वेषाकरणम् । विकथाः स्त्रीकथाद्याश्चतस्रः । निद्रा पञ्चविधा । मद्यं विकटम् । प्रमादोऽज्ञानसंशयादिकः । योगा मनःप्रभृतयः ।

५—14. धावनादिकं प्राग् व्याख्यातम् । स्फोटनं बाह्वायास्फोटनं घटादिभेदनं वा ।

५—15. असब्भूय त्ति—असद्भूतोद्भावनम्—अंगुष्ठपर्वमात्रादिर्जीवः, नवकम्बलो देवदत्त इत्यादिकः ।

५—16. ईसामरिस त्ति—परसम्पदामसहनमीर्ष्या, अमर्षः क्रोधः, एते मनोव्यापाराः ।

५—20. [उत्तरगुण]—

पिंडस्स जा विसोही, समिईओ भावणा तवो दुविहो । पडिमा अभिग्गहा वि य, उत्तरगुणमो वियाणाहि ॥

५—20. [परीसह]—

छुहा पिवासा सीउन्हं, दंसाचेलारइत्थिउ । चरिया निसीहिया सिज्जा, अक्कोसवहजायणा ॥

अलाभरोगतणफासा, मलसक्कार परीसहा । पन्नान्नाण-समत्तं इइ बावीसं परीसहा ॥

५—21. [**उवसग्ग—**] उपसर्गाः १६—

दिव्वा ४ माणुसगा चेव ४, वियाहिया तिरिच्छा य ४ । आयसंचेयणीया य ४ उवसग्गा चउव्विहा ॥

तत्र [**पुढोवेमाया**] पृथग् विमात्रा हास्येन प्रारब्धाः प्रद्वेषेण निष्ठाङ्गता इति ।

५—22. **कुसीलपडिसेवण त्ति**—चतुर्थव्रतलोपनम् । विषयाभिष्वङ्गिणा स्त्र्यादिना । [**घट्टणया**] घट्टनं रजसश्चक्षुःस्थस्य । [**थंभणया**] स्तम्भनता पादाद्यङ्गस्य । [**लसणया**] श्लेषनताऽङ्गानां वातादिना । [**पवडणया**] प्रपतनं भूमौ देहस्य ।

***चरणसोहणत्थं चेति**—चकारात् ज्ञानदर्शनशुद्ध्यर्थं च प्रायश्चित्तं ज्ञेयम्, त्रयस्यापि मोक्षकारणत्वात् । चरणशुद्धिश्चारित्रश्रेष्ठता ।

६—13. **विगिंचमाणो विहीयद त्ति**—यद् द्रव्यमधिकमकल्प्यं वा गृहीतं तद्विगिञ्चयन् त्यजन् विधिना तमतिचारं शोधयति ।

६—20. **जाव० तवो चिण्णो त्ति**—ततो महाव्रतेषु नावस्थाप्यते नाधिक्रियते इत्यनवस्थाप्यः ।

६—21. पारं तीरं तपसा अपराधस्य अञ्चति गच्छति ततो दीक्ष्यते यः स पाराञ्ची, स एव पाराञ्चिकस्तस्य यदनुष्ठानम् । तच्च पाराञ्चिकं लिङ्गक्षेत्रकालतपोभिर्बहिष्करणम् । लिङ्गाईहिं पारंचिओ रहितः क्रियते इत्यर्थः ॥ दस पायच्छित्तपयाणि । तत्थ साहवो पुलाग–बउस–कुसील–नियंठा–सिणाय–भेया पंच । एएसिं जं जस्स भवति तमियाणिं भन्नइ—

आलोयण-पडिक्कमणे मीसविवेगे तहा विउस्सग्गे । ततो तवे य च्छट्ठे पच्छित्तपुलाके छप्पेए ॥

बउस–पडिसेवगाणं पायच्छित्ता भवंति सव्वेवि । थेराण भवे कप्पे जिणकप्पे अट्ठहा होइ ॥

आलोयणा विवेगो वा नियंठस्स उ दुवे भवे । विवेगो य सिणायस्स एमेया पडिवत्तिओ ॥

समायिक-साध्वादीनां च पञ्चानां यद्यस्य तत्कथ्यते—

सामाइसंजयाणं पच्छित्ता छेयमूलरहियट्ठ । थेराण जिणाणं पुण तवमंतं छव्विहं होइ ॥

छेओवट्ठावणिए पायच्छित्ता हवंति सव्वे वि । थेराण जिणाणं पुण मूलं तं अट्ठहा होइ ॥

परिहारविसुद्धीए मूलं ता अट्ठ हुंति पच्छित्ता । थेराण जिणाणं पुण छव्विहमेयं वि य तवंतं ॥

आलोयणा विवेगो य तइयं तु न विज्जइ । सुहमम्मि संपरागे अहक्खाए तहेव य ॥

अन्यच्च—

जा संजमया जीवेसु ताव मूला य उत्तरगुणा य । इत्तिरियच्छेयसंजमनियंठबउसा य पडिसेवी ॥

जा तित्थं ताव एए नेया । कृतं प्रसङ्गेन । प्रकृतमुच्यते—तत्र 'करणिज्जा जे जोगा' गाथायां (गाथाङ्क ५) योगाः प्रत्युपेक्षणादिकाः क्रियारूपाः ।

६—31. **आलीण**—आ ईषल्लीनः । बहुतरं लीनः प्रलीनः । भाष्ये तु—"आलीणा नाणाइसु; पइलीणा, कोहाईया पलयं जेसिं गया ते पलीणा उ" इत्युक्तम् ।

६—32. पादमुद्धृत्य अघर्षयन्— रीयेत–गच्छेत् । **तिरिच्छं ति** तिर्यक्कृत्वा कीटिकाद्याकुले देशे । **साहट्टु**-संहृत्य संकोच्य अग्रेतनफणादिना ।

६—34. **जा य सच्चेत्यादि**—पदार्थतत्त्वमङ्गीकृत्य या भाषा सत्या, परमवक्तव्या सावद्यत्वेन; अमुत्रस्थिता पल्लीति कौशिकभाषावत् ॥ १ ॥ तथा सत्यामृषा न वक्तव्या । यथास्मिन्नगरे दश दारका जाता इत्यादि तन्न्यूनाधिकभावे, व्यवहारतोऽस्याः सत्यमृषात्वात् ॥ २ ॥ या च मृषा, यथा–क्रोधाभिभूतो जनकः पुत्रमाह–न त्वं मम पुत्रः । मानाध्मातोऽल्पधनोऽपि पृष्ट आह–महाधनोऽहमित्यादि ॥ ३ ॥ या च बुधैर्जिनादिभिरनाचीर्णा असत्यामृषा आमन्त्रणि–प्रज्ञापनादिलक्षणा अविधिपूर्वकं खरादिप्रकारेण । न तां भाषेत् प्रज्ञावान्–बुद्धिमान्–साधुरिति गाथार्थः ॥ ४ ॥

७—1. **एवं**—वक्ष्यमाणन्यायेन शिष्यो भणतीति शेषः ।

७—9. **तेय त्ति**—तान् योगान् ।

---

*इदं पदं चूर्ण्यां नोपलभ्यते ।

७—10. **का अविसोही**—किन्तु विशुद्धिरेव तत्र विद्यते ।

७—11. **सुहुमपमाय**—यथोक्तविधिह्रासोऽलक्ष्यो यः गुरुसंदिष्टो यथा आलोचयति ।

७—12. **पुव्वं च त्ति**—कार्यकरणकालात् ।

७—14. **गहणे त्ति**—प्राकृतत्वात् ग्रहणानीति दृश्यम् ।

७—16. **सेज्ज त्ति**—वसतिः । **पायपुंछणं**—रजोहरणं उपवेशनरूपं च ।

७—17. **ओहिय इति**—'ओघेण जस्स गहणं भोगो पुण कारणा स ओहोही' । ओघोपधिः सः । 'जस्स य दुगं पि नियमा कारणाओ सो उवग्गहिओ ॥'

७—18. **गहणं तु त्ति**—गहणं कथनमित्यर्थः ।

७—21. **कुलगण त्ति**—कुलं नागेन्द्रादिः, गणः कोटिकादिः ।

७—23. **बहियाणिग्गमो त्ति**—किमपेक्ष्य बहिरित्याह ।—**गुरुमूलाओ** त्ति । किमर्थं यातीत्याह—**कल्लादि** ।

७—24. **चेइय दुविहमेयतद्दव्वे**त्यादि—चैत्यं पञ्चधा—साधर्मिकचैत्यं, यथा वा रक्तकसाध्वादीनां प्रतिकृतिरूपम् १ । मङ्गलचैत्यं गृहद्वारदेशादिनिकुट्टितप्रतिमारूपम् २ । शाश्वतचैत्यं नन्दीश्वरादिव्यवस्थितम् ३ । भक्तिचैत्यं भक्त्या क्रियमाणं जिनायतनम्; तच्च द्विधा–साधुनिश्रया क्रियमाणं निश्राकृतम् ४ । तदनिश्रया तु विधीयमानमनिश्राकृतम् ५ । तस्य सामान्येन जिनायतनाख्यचैत्यस्य द्रव्यं हिरण्यसुवर्णादिरूपम्, तस्य विनाशे जायमाने; तथा तद्द्रव्यविनाशने तस्य चैत्यस्य द्रव्यं उपकारकं दारूपलेष्टकादिवस्तु तस्य विनाशने सम्पद्यमाने द्विविधभेदे; त्त(?)त नलमोत्पाटितभेदतो द्विप्रकारभेदे—मूलोत्तरभेदाद्वा द्विविधभेदे । तत्र मूलं स्तम्भकुम्भकादि, उत्तरं तु छादनादि । स्वपक्षपरपक्षजनितविनाशाद्द्वैविध्याद्विविधभेदे । इह चैत्यतद्द्रव्यविनाशमुपेक्षमाणः साधुरनन्तसांसारिको भवतीत्युक्तम् । द्रम्मादिद्रव्यं काष्ठादिदलं चेत्यादिना द्विविधभेदं यत्तद्द्रव्यं चैत्यद्रव्यं तस्य विनाशस्य निवारणादीनि कर्तुं निर्गतो भवतीति चूर्ण्यक्षरार्थः ।

७—25. **पाडिहारियं**—याचितकम् । **अप्पणत्थं**—समर्पणाय ।

७—28. **सन्नायग त्ति**—स्वजनाः ।

८—1. **पासवण त्ति**—मूत्रं भूमौ व्युत्सृष्टं वोसिरइ ति मात्रके ।

८—6. असिवं व्यन्तरादिकृतोपद्रवम् । **ओमं ति** दुर्भिक्षम् । राजदुष्टः प्रत्यनीकपतिः । ग्लानो मन्दः । उत्तमार्थः पर्यन्तक्रियाराधनविषयः ।

८—7. **चक्कथूभ त्ति**—ऋषभजिनपदस्थाने बाहुबलिविनिर्मितं तक्षशिलानगर्यां रत्नमयधर्मचक्रं तद्दर्शनाय व्रजति । स्तूपो मथुरायाम् । प्रतिमा जीवन्तस्वामिसम्बन्धिनी पुरिकायाम् । यत्र सौरिकपुरादौ अर्हतो जन्म, निष्क्रमणभुवं उज्जयंतादि द्रष्टुम्, ज्ञानं तत्रैवोत्पन्नम् । निर्वाणभूमि-दर्शनार्थं च प्रयाति । [**वइग**] व्रजिकं–गोकुलम् । सङ्खडिप्रेक्षा विवाहादिप्रेक्षणम्; आदिशब्दात् शोभनाहारः शोभनोपधिर्यत्र लभ्यते । रम्यदेशदर्शनार्थं च व्रजतीति गृह्यते ।

८—13. **अप्पा० गाहा** । अल्पशब्दोऽभाववाची सर्वपदेषु । तेन मूलगुणविषया विराधना अल्पा न काचित् । पार्श्वस्थाऽवसन्नादिषु दाने ग्रहणे च न काचित् । सम्प्रयोगः सम्पर्कः । स पार्श्वस्थादिभिः सह न आसीत् । **ओह त्ति**—इयमोघतः संक्षेपत आलोचना ।

८—14. **अन्नम्मि वेलाए त्ति**—अर्धमासाभ्यन्तरेऽपि, अन्यस्मिन् सातिचारे, समुद्देशवेलायां अन्यस्यां वेलायां विभागतो विशेषत आलोचनीयम् ।

८—16. **संविग्ग त्ति**—संविग्नाः प्रियदृढधर्माणः ।

८—18. श्रुतग्रहणायान्याचार्यमुपसम्पद्यमानस्य श्रुतोपसम्पत् । सुखं वा दुःखं वा समं सोढव्यमिति सुखदुःखोपसम्पत् । यथा क्षेत्रे वसतः मार्गे व्रजतश्च मम भवदीया निश्रेति सा तथाविधोपसम्पत् । विनयकरणार्थमुपसम्पद्यते यत्र गच्छान्तरे सा तथेति । तदुक्तं भाष्यकृता—

उवसंपय पंचविहं सुयसुहदुक्खे य खेत्तमग्गे य । विणयोवसंपया वि य पंचविहा होइ नायव्वा ॥

८—20. **विभागेण**—विशेषेण ।

८—25. **तट्ठाण त्ति**—तेषां मिथ्यादुष्कृतकरणस्थानानां स्वरूपनिरूपणाय ।

८—32. **अहिक्खेवो त्ति**—किं भवान् जानाति; जात्याद्युद्घटनादि वा । तथा च वक्ति—

डहरो अकुलीणो त्ति य दुम्मेहो दमगमंदबुद्धि त्ति । अवि अप्पलाभबु(ल)द्धी सिस्सो परिभवइ आयरियं ॥

९—1. **जाइकम्माईहिं त्ति**—अहो सन्तापिता वयमनेन रे बालिकेनेति ।

९—2. **जमलिय त्ति**—समश्रेण्या गच्छति । पुरोऽग्रतः स्थितो व्रजति । गुरुं प्रतीत्याभ्युत्थानकरणादिको यो विनयः कायिकस्तस्य भङ्गोऽकरणम् ।

९—4. **इच्छा०** गाहा । **उवसंपया०** गाहा—व्याख्या—इच्छया बलाभियोगमन्तरेण करणं इच्छाकारः–इच्छाक्रिया । तथा चेच्छाकारेण ममेदं कुरु । इच्छाक्रियया न बलाभियोगपूर्विकयेति भावः ॥ १ ॥ तथा मिथ्या–वितथानृतमिति पर्यायः । मिथ्याकरणं मिथ्याकारः मिथ्याक्रियेत्यर्थः । तथा च संयमयोगवितथाचरणे विदितजिनवचनसाराः साधवस्तत्क्रियाया वैतथ्यप्रदर्शनाय मिथ्याकारं कुर्वते मिथ्याक्रियेयमिति हृदयम् ॥ २ ॥ तथाकरणं तथाकारः, स च सूत्रप्रश्नगोचरो यथा भवद्भिरुक्तं तथेदमित्येवंरूपः ॥ ३ ॥ अवश्यकर्तव्यैर्योगैर्निष्पन्ना आवशि(श्य)की वसतेर्निर्गच्छद्भिर्या क्रियते ॥ ४ ॥ निषेधेन निर्वृत्ता नैषिधिकी, वसतौ प्रविशद्भिर्या विधीयते ॥ ५ ॥ आपृच्छनमापृच्छा, सा विहारभूमिगमनादिषु प्रयोजनेषु गुरोः कार्या ॥ ६ ॥ तथा प्रतिपृच्छा, सा च प्राग्नियुक्तेनापि कार्यकरणकाले कार्या, निषिद्धेन वा प्रयोजनतः कर्तुकामेनेति ॥ ७ ॥ तथा छन्दना च, प्राग् गृहीतेनाशनादिना कार्या, भवन्तो गृह्णन्तु ॥ ८ ॥ तथा निमन्त्रणा, अगृहीतेनैवाशनादिना अहं भवदर्थमशनाद्यानयामीत्येवंभूता ॥ ९ ॥ तथा चाभिहितम्—

आपुच्छणा उ कज्जे, पुव्वनिसिद्धेन होइ पडिपुच्छा । पुव्वगहिएण छंदण–निमंतणा होइ अगहिएण ॥

९—5. **[उवसंपयाओ]**—ज्ञानदर्शनचारित्रार्थमुपसम्पच्च विधेया ॥ १० ॥ इत्यादि शब्देन गृह्यते । लहुसगं–सूक्ष्मम्, तत्स्वरूपं गाथाद्वयेन दर्शयति—**पयले**त्यादिना । व्याख्या—**पयल त्ति**—दिवा कोइ साहू पयलंतोऽन्नेण साहुणा भन्नइ—'किं दिवा पयलायसि?' । तेण भणियं—'न पयलामि' । एवमबलवन्तस्स मासलहुयोगो लहु मुसावाओ । एवं जत्थ जत्थ मासलहु तत्थ तत्थ सुहमो य मुसावाओ ॥ १ ॥ **ओल्ले** त्ति—ओल्लं, वासं । कोइ साहू वासे पडमाणे अन्नयरपओयणे पडि(ट्ठि)ओ । अन्नेण साहुणा भन्नइ—'अज्जो किं वच्चसि? वासंते । पडि(ट्ठि)य साहुणा तओ भन्नइ—'वासंते हं न गच्छे ।' एवं भणिऊण वासंते चेव पडि(ट्ठि)ओ । तेण साहुणा भणियं—'णणु अलियं ।' इयरो पच्चाह—न । कथं? । उच्यते—नणु वासबिंदवो एए । वासं पाणियं तस्स एए बिंदवो थिवुगा । वृष्टिरिह आर्द्रत्वेचतुः (?) सा नेयं ॥ २ ॥ **मरुय त्ति**—कोइ साहू कारणविणि[ग्ग]ओ उवस्सयमागंतूण भणइ—'निग्गह, मरुया द्विजा भुञ्जते, अम्हे वि तत्थ गच्छामो ।' ते साहू जाव संपट्ठिया—कहिं ते भुञ्जन्ति? भिक्षाटने न दृष्टाः । तेण भन्नइ—नणु सव्वगेहेसु—आत्मीयगृहेष्विति ॥ ३ ॥ **पच्चक्खाणे त्ति**—कोइ साहू केणइ साहुणा उदग्गभोयण[illegible]काले भणिओ—'एहि भुञ्जसु' । तेण भणियं—'भुञ्जह तुब्भे; पच्चक्खायं ममेति ।' एवं भणिऊण मं[ड]लीए तक्खणा चेव भुंजिओ । तेण साहुणा वुत्तो—'अज्जो तुमं भणसि मम पच्चक्खायं?' । सो भणइ—'कहं न, नणु पाणाइवायाइया अविरइ सा मए पच्चक्खाया ।' अवयं प्रत्याख्यातमिति भावः ॥ ४ ॥ **गमणे त्ति**—केणइ साहुणा चेइयवंदणाइपओयणे वच्चमाणेण अन्नो साहू भणिओ—'वच्चसि?' । सो भणइ—'नाहं वच्चे, वच्च तुमं ।' सो साहू पयाओ । इयरो वि तस्स मग्गओ तक्खणादेव पयाओ । तओ साहुणा पुच्छिओ—'कहं न वच्चामि त्ति भणिऊण वच्चसि?' सो भणइ—'सिद्धन्तं न जाणसि' ।

कहं ? । उच्यते—'नणु गम्मइ गम्ममाणं, न अगम्ममाणं । जम्मि समएऽहं तुमे पुट्ठो, तम्मि समए न चेवाहं गच्छो ॥ ५ ॥ **परियाए त्ति**—कोइ साहू केणइ साहुणा वंदिउं कामेण पुच्छिओ—'कइ वरिसाणि ते परियाओ ? ।' सो एवं पुच्छिओ भणइ—'एयस्स साहुस्स मज्झ य दसवरिसाणि परियाओ ।' छलवादमङ्गीकृत्य ब्रवीति । सो पुच्छंतगसाहू भणइ—'मम नववरिसाणि परियाओ ।' एयस्स य वे पंचगा दसओ, इति मा पादपतनं कुरु ॥ ६ ॥ **स[मु]द्देस त्ति**—कोइ साहू कारणनिग्गओ रविं परिवेसपरिवियंतं दट्ठूण ते साहवो सत्थे अत्थमाणे तुरियं भणइ—'भोजनवेला वर्तते, उट्ठेह ।' साहू गहियभायणा उट्ठिया भिक्षाटनाय । पुच्छंति—'कत्थ समुद्देसः ?' छलवादी प्राह—नणु एस गमणमग्गम्मि । आदिच्चे गहणं राहुणा क्रियमाणं दर्शयति ॥ ७ ॥ **संखडे त्ति**—कोइ साहू पढमालिय पाणगाइ विणिग्गओ पच्चायाओ भणइ—'इह अज्ज निवेशे पउराओ संखडीओ ।' ते य साहवो भिक्षाटने गन्तुकामा इच्छंति ...... [**अत्र कियान् पाठः खण्डितः प्रतिभाति ॥ खुड्डुग त्ति**—] 'कोइ साहू उवस्सयसमीवे मयं सुणहीं दट्ठूण खुड्डगं भणइ—'क्षुल्लक ! तव माता मृता ।' ताहे सो खुड्डओ परुण्णो । तं रुयंतं दट्ठूण साहू भणइ—'मा रुय, जियइ त्ति' । एवं भणिए खुड्डो अन्ने य साहुं भणंति—'किं तुमं भणासि जहा मया ?' । सो मुसावायसाहू भणइ—'एसा साणी जा मया, सा तुज्झ माया भवति' । 'कहं माया भवइ ?' अतीयकाले भविंसु । जओ भगवओ भणइ—एगमेगस्स णं जीवस्स सव्वजीवा माइत्ताए भज्जपुत्तधूयत्ताए भूयपुव्वा । तेण साणी [माया] भवति ॥९॥ **परिहारिय त्ति**—कोइ साहू उज्जाणाइसु ओसन्नाइ दट्ठुं आगंतूण भणइ—'मए दिट्ठा परिहारिया' । सो छलेण कहइ; इयरे साहवो जाणंति—जहा परिहारतवावन्ना अणेण दिट्ठा उज्जतविहारिणः ।' तदनु तद्दर्शनाय गमनादौ कृते यावद् दृष्टाः पार्श्वस्थाः । तदसौ छलवादी उत्तरयति—'नन्वेतेऽपि परिहारिका अभक्षादिपरिहरणात् । परिहरन्तीति परिहारिका इति कृत्वा' ॥ १० ॥ **मुहीओ त्ति**—एगो साहू विहा(या b)रभूमिं गओ—'उज्जाणदेसे इत्थी घोडमुही दिट्ठ'त्ति साहूणं कहेइ । अश्वमुखी स्त्री इत्यर्थः । जनगमने घोटिकां कथयति ॥११॥ **अवसगमणं ति**—कोइ साहू केणइ साहुणा पुच्छिओ—'अज्जो गच्छसि भिक्खायरियाए ?' सो भणइ—'अवस्सं गच्छामि ।' तेण साहुणा पगिहियभायणोवगरणेण भन्नइ—'एहि वच्चामो' । सो पच्चाह—'अवस्सगंतव्वे न ताव गच्छामि' । 'किं न जासि ?' पुच्छिओ भणइ—'वेला न ताव वट्टइ' परलोगगमणवेला मोक्खगमणवेला वा न ताव जायइ । तो न ताव गच्छामि । परं अवस्स परलोगं मोक्खं वा गमिष्यामीत्यर्थः ॥ १२ ॥ **दिस त्ति**—एगो साहू एगेण साहुणा पुच्छिओ—'अज्जो कयरं दिसं भिक्खायरियाए गमिस्ससि ?' । सो भणइ—'पुव्वं ।' सो पुच्छंतगसाहू अग्गाहेऊण गओ अवरदिसं । इयरो वि पुव्वदिसगमणवाई अवरं गओ । 'अज्जो ! तुमे भणियं "अहं पुव्वं गमिस्सामि ।" कीस अवरदिसमागओ ?' एवं पुट्ठो भणइ—'अन्नस्स अव[र]गामस्स इमा पुव्वा किं न भवइ ?। भवइ चेव ॥ १३ ॥ **एगकुले त्ति**—कुलं गृहं भिक्खनिमित्तुट्ठिएण साहुणा भन्नइ—'अज्जो ! एहि वयामो भिक्खाए' । सो भणइ—'अहमेगकुलं गच्छं, एगकुले एव मया अटितव्यं । वच्चह तुब्भे' । गया साहवो । सो वि य पच्छा बहुकुलायं पविसइ । तेहिं साहूहिं भणिओ—'अज्ज ! तुमे भणियं—एगकुले पविस्सिसं ।' बहुकुलपवेसे पुट्ठो भणइ—'कहं एगसरीरेण दोन्नि कुले पविस्सिस्सं । एगं चेव कुलं पविसे ॥१४॥ **एगदव्वे त्ति**—साहुणा एगेण एगो साहू भन्नइ—'वयामो भिक्खाए ।' सो भणइ—'वच्चह तुब्भे । एकमेव मया द्रव्यं ग्रहीतव्यं' । तओ ओयणदोव्वगाइ बहुदव्वे गिण्हंतो तेसिं (हिं) साहूहिं दिट्ठो भणिओ य—'अज्जो ! तुमे भणियं—एगं दव्वं घेच्छं, कहं अणेगाणि गिण्हसि ?' । अत्थो—धम्मत्थिकायाईणि दव्वाणि छ तेसिं धम्माइयाणं मज्झे गहणलक्खणो पुग्गलत्थिकाओ एगो च्चेव । अन्नेसिं गहणलक्खणं नत्थि । तम्हा अहं एगं दव्वं गिण्हामि; बहुग्गहणेऽपि सति समस्तान्यपि द्रव्यमेकमेव ॥ १५ ॥

९—8. **लहुसादिण्णं पुणेत्यादि**—सूक्ष्मादत्तं उपलादिग्रहणविषयम् ।

९—9. **इत्तिरियं**—अल्पकालं वृक्षादिच्छायावग्रहादौ विश्रमणाय ।

९—10. लहुसमुच्छा द्रव्यक्षेत्रकालभावभेदाच्चतुर्धा तां क्रमेणाह—**लहुस[मु]च्छा** इत्यादि । **कागाइसाणे त्ति** शय्यातरगृहादौ काकादिपातं निवारयति, बलीवर्दकल्पछकं लघुपुत्रादि रक्षति ॥ १ ॥

९—11. **खेत्ते ओवास त्ति**—अवकाशः प्रतिक्रमणादि[स्था]नप्रदेशः ।

९—12. **रागदोसाइ** मासमध्येपि ॥ **एत्थ त्ति**—काकादौ । **ठाणा**—आपत्तिस्थानं; **खेप्पन्ति**—प्रतिक्रमणार्हमध्ये ।

९—17. **असंकिलिट्ठकम्मं ति**—कुष्ठादौ शरीरक्रियायाम् । छेदनं दुष्टाङ्गस्य । पीलनं रुधिरादिकर्मणः । भेदनं पक्कादिगडस्य । संघर्षणं दद्र्वादेः । अभिघातसेचनं लगुडादिप्रहारस्योष्णजलादिना । कायखाराइ प्रसूत्यादिषु । असुसिरं पुतादिः, सुसिरं उदरादिः । अणन्तरं अव्यवहितम् । परम्परं वस्त्रादिना व्यवहितमङ्गम्; इत्यादिकं असंक्लिष्टकर्म । कन्दर्पः-वाचिको नर्मादिभाषणम्; कायिकश्च धावनादिकः ।

९—22. **सव्वपदाणि**—दंसणाईणि २४ ।

९—25. **छूढे**—उत्क्षिप्ते । **पमादो** अज्ञा[ना]दिकस्तेन । **असंपउत्तस्स**—असंयुक्तस्य पञ्चविधप्रमादरहितस्य । **णोवजुत्तस्स**—विस्मृतिरहितस्तस्य ।

९—30. **सन्नि त्ति**—संज्ञानं संज्ञा—देवगुरुधर्मपरिज्ञानं, तद्यस्यास्ति स संज्ञी श्रावकः । **सन्नायगा**—संज्ञातकाः स्वजनाः मातापित्रादिकाः । **भयं**—सप्तप्रकारं प्रसिद्धं । **सोगो**—अनिष्टानां द्रव्याणां संयोगेन शोकः । इष्टानां वियोगेन ।

९—32. **बाउसत्तं**—बकुशत्वं कश्मलचारित्रत्वम् ।

बउसं सबलं कब्बुरमेगट्ठं तमिह जस्स चारित्तं । अइयारपंकभावा सो बउसो होइ नायव्वो ॥

१०—4. **संभमो**—संभ्रमः संक्षोभः । **भयं**—दस्युविषयं । दस्यवश्चौराः । **मिलक्खू**—म्लेच्छाः । **बोहिय त्ति**—बन्दिकाः । **मालवा**—उज्जयनीतस्कराः । आतुरः—पीडितः । **दिगिंछा**—बुभुक्षा तृष्णादिभिः ।

१०—6. **[वोच्छिन्नमडंबाइ]**—वोच्छिन्ना जस्स सव्वासु वि दिसासु नत्थि कोइ अन्नो गामो नगरं वा तं; पार्श्वग्रामादिरहितं मडम्बं । तथा च—मडम्बं सव्वओ च्छिन्नमिति पठ्यते ।

१०—8. **अणप्पवसओ**—हस्त्यादिपरवशस्य । **कारणेहिं**—संभ्रमादिभिः प्रदर्शितैः । पवणाय विराधयेदिति शेषः ।

१०—10. मृषावादः कूटसाक्षित्वेन । मैथुनं अतिक्रमादिना । रात्रिभोजनं दियागहियाइभेदतः । दीर्घमार्गे व्रजतां घृतमिश्रकेलकादिरूपोऽध्वानकल्पः । **लेवाडइय त्ति**—क्षीरान्नादि उत्सर्गतो न ग्राह्यम् तदप्यापद्येत ।

१०—15. **दुच्चिन्तियं**—कुंकणार्यकवत् वनदवदानचिन्तनादि । दुर्भाषितं अभूद्भूतोद्भावनादि । दुश्चेष्टितं धावनादि ।

१०—25. **उवहि त्ति**—ओहेण जस्स गहणं, भोगो पुण कारणा स ओहोही ।

जस्स दुगं पि नियमा, कारणओ सो उवग्गहिओ ॥

१०—29. अशङ्कितं निर्णीतं दोषवदेवेदमिति, दोषवत्त्वेन । **विहिण त्ति**—अणावायमसंलोए इत्यादिकया ।

१०—31. **[कालाइच्छियं—]** प्रथमप्रहरगृहीतं तृतीयप्रहरान्तं यावद् ध्रियते अशनपानादि तत्कालातिक्रान्तम् । **[अद्धाणाइच्छियं—]** यद्गव्यूतद्वयात्परेणानीतं नीतं वा परिभुज्यते तदध्वानातिक्रान्तम् ।

१०—32. **इंदियमाइहिं त्ति**—इन्द्रियमाया-इन्द्रजालादिभिः । चक्षुरादि-इन्द्रियाणां विक्रिया आसाढभूतिवत् । **गिलाणेत्यादि**—ग्लानादिव्यावृतत्वेन । सागारिका वा परिष्ठाप्यस्थाने सन्ति । स्थण्डिलस्य वाऽभावः । चोरादि भयं वा तत्रेत्यशनादि परिष्ठाप्यातिक्रमेऽपि विधिना परिष्ठापयन् शुद्धः । दुर्लभद्रव्यप्राप्तौ सहसात् लाभो वा जातः ।

११—7. **गमणं**—अन्नत्थ हत्थसयबाहिं ।

११—9. **पट्ठवण त्ति**—अनुयोगप्रारम्भादिविषया । **पडिक्कमण** न्ति अनुयोगस्य । **परियट्टणा** गुणनम् ।

११—10. **अणवज्जसुमिणं** दुःस्वप्नः । दुर्निमित्तं अपश्रुतिगोचरम् । दुःशकुनादेः प्रतिघातार्थम् । अष्टोच्छ्वासोत्सर्गकृतिरिति युक्तम् । तत्र वक्ष्यमाणगाथोक्तादिशब्दसूचितोऽयमर्थः ।

११—12. **उत्तरणं**—परकुयउं । **णईसंतारो**—नद्युत्तरणम् ।

११—14. **संघट्ट**—१ संघट्ट २ लेव ३ उपरिलेपैस्त्रिरूपो नदीसन्तारस्तत्र जङ्घार्धः संघट्टः । १ । नाभिं यावत् लेपः । २ । परेण लेवुवरि—नाभेरुपरि । ३ । बाहु उडुपतुप्पाकादिश्चतुर्थः । ४ ।

११—16. सयणासणाणं आयणत्थं गओ। ते य दाया घरे अत्थि। वाउलो वा। तओ इरियं पडिक्कमिऊण जं किंचि कालं सज्झायं करेइ।

११—20. हत्थमेत्ते वि त्ति—रेल्लए जाते इति शेषः।

११—28. छिज्जइ त्ति—विभज्यते। पडिक्कमणं च अनुयोगस्य ज्ञेयम्।

१२—1. आदिशब्दात् कालप्रतिक्रमणे चेति च ग्राह्यम्, कालादिविपर्ययात्। ज्ञानाचारातिचारो भवति। व्यञ्जनादिभेदाद्वाकृतात्।

१२—5. ‍ीलयति—वा यो गुरुम्।

१२—12. ओरसो त्ति—आन्तरः।

१२—15. वञ्जयति—व्यज्यते। सन्न त्ति—संज्ञाभिधानम्।

१२—16. अन्नाभिहाणेण वा भणइ त्ति—यथा 'धम्मो मंगल'मित्यादिपरित्यागेन 'पुन्नं कल्लाणमुत्तमं, दयासंवरनिज्जरा' इत्यादि नामान्तरेण। अर्थभेदस्तैरेव व्यञ्जनैर्यत्र विकल्प्यते, यथा आचारसूत्रे आवन्त्यध्ययनमध्ये 'आवंती के आवन्ती लोगंसि विप्परामसन्ती ति—अन्योऽर्थः कल्प्यते—'आवन्ति होइ देसो तत्थ उ अरहट्टकूवजा केया। सा पडिया हेट्ठे ऊ तं लोगो विप्परामसइ।' यत्र सूत्रार्थौ द्वावपि विनश्येते स तदुभयातिचारः। यथा—

धम्मो मंगलमुक्कत्थो अहिंसा पव्वयमत्थए। देवावि तस्स नस्संति जस्स धम्मे सया मसी॥

अहागडेसु रंधंति कट्ठेसु रहकारिओ। रण्णो भत्तंसि णो जत्थ गद्दभो जत्थ दीसइ॥

अत्र सूत्रं अर्थश्च द्वावपि विनश्येते। उभयविनाशे चरणनाशस्तदभावे मोक्षाभावस्तदभावाद्दीक्षानैरर्थक्यम्।

१२—19. अणागाढे सुए—दसवैकालिकादिके उद्देशकस्यातिचारेऽकालातिपाठे निर्वि०। आगाढे उत्तराध्ययनभगवत्यादिके श्रुते उद्देशकादिस्थानेषु पुरिमार्धादि क्षमणान्तम्। अर्थेऽप्येवम्।

१२—22. ओहेण—आगाढाणागाढादिभेदतोऽविशेषे।

१२—23. कमेण अहिज्जंतो त्ति—कमश्चायं—

ति वरिसपरियागस्स उ आयारपकप्पनाममज्झयणं। चउवरिसस्स सम्मं सूयगडं नाम अंगं ति॥ १॥

दसकप्पव्ववहारा संवत्सरपणगदिक्खियस्सेव। ठाणं समवाओ विय अंगेए अट्ठवासस्स॥ २॥

दसवासस्स वियाहा एक्कारस वासयस्स इमे उ। खुड्डियविमाणमाई अज्झयणा पंच नायव्वा॥ ३॥

बारसवासस्स तहा अरुणुववायाइ पंच अज्झयणा। तेरसवासस्स तहा उट्ठाणसुयाइया चउरो॥ ४॥

एगूणवीसगस्स ओ दिट्ठीवाओ दुवालसममंगं। संपुन्नवीसवरिसो अणुवाई सव्वसुत्तस्स॥ ५॥

जं केवलिणा भणियं केवलनाणेण तस्सओ नाउं। तस्सन्नहा विहाणे आणाभंगो महापावो॥ ६॥

१२—24. [अपत्तो]—तत्सूत्रमर्थं वा विवक्षितशास्त्रसत्कं क्रमेणाधीयानो न प्राप्नोति; पठनविषये व्रतादि पर्यायो वा यस्य न पूर्यते सोऽप्राप्तः। अन्यश्चायोग्यो यः सो अपत्तो त्ति—अपात्रं। स च तिन्तिणिकादिकः। तिंतिणिओ स्तोकोक्तेऽपि यत्किञ्चनभाषी। चलचित्तः—अस्थिरचित्तः। गणाद्गणान्तरं संक्रमणशीलो वाऽपात्रम्। अव्यक्तः—अपात्रम्। अव्यक्तता च वयसाऽतिलघुः। वयश्च प्राणिनां कालकृता शारीरावस्था। श्रुतेन चाल्पश्रुतोऽव्यक्तः। एतेषां सर्वेषामप्राप्तादीनां वाचना-श्रुतपाठनम्।

१२—26. जइ पत्तं प्राप्तं। सुएण श्रुतिक्रमेण। पत्तं वा पात्रं-योग्यम्।

१२—30. निसेज्जं ति—आचार्ययोग्याम्। च शब्दात् वन्दनकायोत्सर्गौ अनुयोगप्रारम्भे उत्सर्गेत आयंबिलम्।

१२—34. विगई भुंजेऊण त्ति—आत्मसमत्ती तां भुक्त्वा पश्चात्कायोत्सर्गं विधत्ते। पगट्ठं ति एकत्र विकृतिमाचाम्लप्रायोग्यं च गृह्णाति।

१३—5. संकादयोऽष्टा ८।

१३—11. [भइमो]—भजामः सेवयामः कुर्मः इत्यर्थः।

१३—13. मंडलि त्ति—तस्यां सर्वे संसद्भोज[जि]नः। मोय त्ति—योगः। जल्ल त्ति-सर्वे मलमलाः। पूजा राजादिभिः क्रियमाणा कुतीर्थिनाम्। अतिशयाद्वा मन्त्रादिकाः, मतानि वा तदागमात् श्रुत्वा।

१३—16. मिच्छत्ताइ—मिथ्यादृष्टिचरकादीनाम्। उववूहा—उपबृंहा अप्रशस्ता।

१३—19. एवं शङ्कादीन् प्ररूप्य प्रायश्चित्तं चिन्त्यम्—मिच्छत्ता णं ति। स्थिरीकरणादीनामादिशब्दाद्गृहीतानाम्।

१३—23. च शब्देन देशे क्षमणमिति योगः।

१३—24. ओहओ त्ति—पुरुषानपेक्षया। अट्ठसु वि त्ति मिथ्यात्वविषयेषु च सर्वतोऽष्टास्वपि वक्ष्यमाण भिक्षुवृषभउपाध्यायाचार्याणां चतुर्णां यथासंख्यं पुरिमड्ढादि यथोपदिष्टम्। तच्च देसे मिच्छत्तस्सत्यादिना दर्शितम्। मिथ्यात्वविषयेषु च सर्वतोऽष्टास्वपि मूलमिति वक्ष्यति।

१३—26. प्रशस्तेषूपबृंहणादिषु यत्यादिविषयेषु इदमाह—एवं चिय इत्यादि। यतिविषयाणां उपबृंहादीनामविधाने। अणन्तरुद्दिट्ठं ति—पुरिमाई खमणंतमित्येतत्।

१३—31. तप्पसाएणं ति—पार्श्वस्थादिप्रसादतस्तद्वशात्। पार्श्वस्थादीनां परिपालनादिकं वात्सल्यं कुर्वतां भिक्षुप्रभृतीनां यथोपदिष्टं प्रायश्चित्तम्।

१४—6. ननु पृथिव्यादीनां चतुर्णां भवतु संघट्टनं अप्कायं प्रति कथं संघट्टनादि संभवति, द्रवरूपत्वेन स्पर्शेऽपि मरणं संभवादित्याह—आउक्काएत्यादि।

१४—7. ईसिं मनाक्। घटादिस्थस्य चालने पादादिना संघट्टः। परितापो गाढतरचालना। उद्दवणं च वह्निना परितापनं। हननं दण्डादिना। पानेन चरणादिक्षालनादिना च उद्दवणं अप्कायस्य।

१४—9. अणागाढं अनिर्भरम्। पञ्चेन्द्रियसंघट्टश्च—तदहर्जातमूषिकागिरोलिकादिसर्वविषयो दृश्यः।

१४—13. पमाय०—प्रमादतोऽपद्रापणे। पक्ककल्लाणगं। नि०। पु०। ए०। आ०। उ०। इत्येककल्याणकादिविषयः।

१४—15. तत्र मृषावादो धर्मास्तिकायादिसर्वद्रव्यविषयः। अदत्तादानं ग्रहणधारणीयवस्तुविषयम्। परिग्रहस्तु सचित्ताचित्तमिश्रसर्वद्रव्यविषयः। क्षेत्रतो लोकालोकविषयौ मृषावादपरिग्रहौ। अदत्तादानं च ग्रामाद्याश्रयम्। कालतश्च दिवारात्रौ वा। भावतो रागतो देसतो वा। त्रितयमपि जघन्यादिवस्तुविषयं मृषावादाद्यपि जघन्याद्युच्यते।

१४—20. लेवाडयपरिवासे पात्रतुम्बकपात्राबन्धखरण्टितपर्युषितत्वे अभक्तार्थो। सुंठ्यादौ च।

१४—22. पढमभंगो त्ति—दिवा गृहीतं दिवा भुक्तं परं रात्र्युषितं द्रष्टव्यमित्याद्यो भङ्गः।१। दिवा गृहीतं रजन्यां भुक्तमिति द्वितीयः।२। रजन्यां गृहीतं दिवा भुक्तमिति तृतीयः।३। रजन्यां गृहीतं तस्यामेव भुक्तमिति चतुर्थः।४। द्वित्रिचतुर्थेष्वष्टमम्।

१४—33. ओहुद्देसियं जमप्पणोट्ठाए रद्धं तम्मज्झाओ भिक्खाओ कइ विकप्पइ, दानार्थं य एष्यति तस्मै दत्ते १। उद्देसकडे कम्मे एक्केक्के चउव्विहो भेओ—जावंतियमुद्देसं, पासंडीणं भवे समुद्देसं, समणाणं आएसं, निग्गंथाणं समाएसमिति चत्वारो भेदाः। तत्राद्ये जाव इइ उक्कोइएयस्सइ पासंडीणं दायव्वं न गिहत्थाणं २। निर्ग्रन्थशाक्यादिभेदतः पञ्चधा श्रमणास्तेषाम् ३। निग्गन्थाण साहूणमेव नऽन्नेसिं ४। तत्थ संखडिभुत्तुव्वरियं चउन्हमुद्दिसइ जं तमुद्दिट्ठं। वंजणमीसाइकडं करंबादिकं। तमग्गितवियाइ पुण कम्मं गुलं विग्घारेऊण मोयए बंधिज्जा—इति कर्मौद्देसिकं।

१५—7. यावदर्थिकमिश्रपासंडमिश्र[साधुमिश्र]भेदतस्त्रिधा मिश्रम्। यत्र स्वगृहयोग्यजलकणादीनां मध्ये अधिकतरजलकणादीन् मिश्रितान् कृत्वा यदशनादि प्रथमतोऽग्निज्वालनाद्ग्रहणदानादिप्रस्ताव एव राद्धुमारभते। यावदर्थिकाद्यर्थं तत्त्रिधा।

१५—9. संघाडगस्स एगो भिक्खग्गाही। वीओ दिसुवओगं देइ। तइए गिहे निप्फेडिया। इत्तरट्ठवियं। तओ परेण सव्वमेव चिरट्ठवियं।

१५—10. सुहुमा—कप्पट्ठगस्स भत्तं न देइ, भणइ साहुस्स अट्ठाए उट्ठिया तुज्झ वि दाहं ति। बायरा—कप्पट्ठिए विवाहं काउकामो रहमाईसु साहुसमागमं जाणिऊण ओसक्कणं करेज्जा।

१५—11. आहारसेज्जाइयं साहुणो भुंजिस्संति, रंधिउं अन्नो सव्वमेवाहारं बहिं नीणेइ साहुअट्ठाए। एयं पागडकरणं। रयणप्पईवजोईवायायणकुड्डछेड्डाइएहिं उज्जोयकरणं साहुअट्ठाए [एयं पगा-]सकरणं।

१५—16. **आहडं ति**—स्वग्रामाहृतं निष्पत्यवाया ।४। आहडं चिय आइन्नमणाइन्नं च, तिघरंतरमाइन्नं ।

१५—18. दर्दरकः जतुग्रंथ्यादिरूपः । पिहितं च छगणादिना ओलित्तं ।

१५—19. मालं सीककप्रासादोपरितलादिकमभिप्रेतम् । तस्मादाहृतं करग्राह्यं यदन्नादि दात्री ददाति तन्मालापहृतम् । नवरं त्रिधा एतज्जघन्यमध्यमोत्कृष्टभेदतः । जघन्योत्कृष्टयोरन्तरे मध्यमो गम्यत एवेति नोक्तम् । पाष्ण्र(र्ष्णु)त्प[...]कक्रियागृहीतत्वाज्जघन्यं लघु । मञ्चकादयो दत्वा यद्ददाति शिक्कादेस्तन्मध्यमं मालापहृतम् । यदा च उच्चतरशिक्कादेर्लड्डुकादिग्रहणाय मूडकनिश्रेण्याद्युदूखलं वा अधो दत्वा तस्मात् ददाति तदोत्कृष्टं भवति । अत्राप्यायामम् ।

१५—20. **अच्छेज्जं ति**—प्रभुर्गृहादिनायकः, अन्येषां दरिद्रकौटुम्बिकानां बलाद्दातुमनीप्सितामपि यद्देयं ददाति तत्प्रभुआच्छेद्यम् । स्वामी ग्रामादिनायकः, स यदा साधून् दृष्ट्वा कलहेनेतरथा वा कौटुम्बिकेभ्योऽशनाद्युदाल्य ददाति तदा स्वाम्याच्छेद्यम् । स्तेनाश्चौरास्ते सार्थकेभ्यो बलादाच्छेद्य यत्पाथेयादि साधुभ्यो दद्युस्तत् स्तेनविषयाच्छेद्यम् ।

१५—21. **अणिस[ट्ठं] ति**—बहुभिः साधारणं बहुजनसाहिकं यदशनादि संखड्यादौ स्वाम्यमनुज्ञातं यदेको दद्यात्तत्साधारणानिसृष्टम् । चोल्लको भोजनम् । यथा किल कश्चित्कौटुम्बिको भक्ताहारकहस्तेन गृहात् क्षेत्रे हालिकानां भोजनाय चोल्लकं प्रस्थापयति । तत्र कौटुम्बिकेन साधूनां दानाय मुत्कलितचोल्लकमध्यात् यदि हालिकः किञ्चित्साधवे ददाति तदा चोल्लकानिसृष्टम् । तथा जड्डस्य हस्तिनः सम्बन्धि पिण्डरूपं वस्तु राज्ञा गजेन वाननुज्ञातत्वादनिसृष्टं जड्डानिसृष्टम् ।

१५—22. यावदर्थिकाः समस्तार्थिनः । पाषण्डिकाश्चरकादयः । साधवश्च निर्ग्रन्थाः । अत्र गृहिणः स्वार्थमग्निज्वालनाद्याद्रहणदानान्ते आरंभे कृते सति पश्चात्स्वार्थकल्पितं तन्दुलमध्ये कर्पटिकार्थं तन्दुलादीनां माणकं संकल्पितं प्रक्षिप्य राध्नोति यदा, तदध्यवपूरकः । स च त्रिधा—स्वगृहयावदर्थिकमिश्रः, स्वगृहपाषण्डमिश्रः, स्वगृहसाधुमिश्र इति । इह आहाकम्मं उद्देसियचरिमतियं, भत्तपाणपूइयं, पासंडसाहुमीसं, बायरपाहुडिया दुविहा, अज्झोयरचरिमदुगं एए छउग्गम दोसा अविसोही कोडी; विसोहिकोडीए अवयवेणाविच्छिक्कं सव्वमभोज्जं विष्ठादि(ति ?) दुष्टेणेव भक्तं । विसोहिकोडीए पुण संथरणे परिट्ठवेइ । अलंमे अन्नस्स असंथरंतो वा तम्मत्तमेव परिट्ठवेइ । जइवि य अवयवा तहा विसुद्धो ।

१५—24. **धाई** पंचहा–खीरधाई मज्जण-मंडण-कीलावण-अंकधाई बालपालिका स्त्री धात्रीत्वकरणमिति तत्त्वम् । एवं यथासंभवमन्यत्रापि । दूती परस्परसन्दिष्टार्थकथिका स्त्री—दूतीत्वकरणमित्यर्थः । तत्कथयति—स्वग्रामे परग्रामे वा । स्वनिवासग्रामस्यैव सत्केऽन्यस्मिन् पाटकादौ, परग्रामे वा संदेशकं नीत्वायं पिण्डं लभते स दूतीपिण्डः ।

१५—25. अतीताद्यर्थसूचकं निमित्तं जातिकुलगणकर्मशिल्पानां कथनादिना आजीवनम् ।

१५—26. वनीपकत्वं पिंडट्ठा समणा-तिहि-माहण-किविण-सुणगाइ-भत्ताणं अप्पाणं तब्भत्तं दंसइ जो सो वणीवमो त्ति । उउ(?)वर्णयति पिण्डार्थमात्मानं दायकाभिमतेषु श्रमणादिषु संभक्तं दर्शयतीति भक्तवशाद्वनीपकः । यद्वा वनीं लब्धार्थरूपां पाति पालयतीति वनीपः, स एव वनीपकः ।

१५—27. चिकित्सा रोगप्रतीकारः । तत्र नाहं वेद्यो, अप्पणो वा अमुगो वाही अमुगदव्वेण फिट्टोत्ति, एसा सुहुमतिगिच्छा । बायरा वाय-सिंभ-सन्निवाय-समुत्थाणं रोगाणं ओसहमाइयं साहइ । सयमे[व]से किरियं करेइ । वाहिविआरं किरियं वा से साहेइ ॥—क्रोधादयः प्रतीताः ।

१५—28. **वयण-संथवो**—पुव्विं गुणथुइं काऊण पच्छा मग्गइ । **पच्छासंथवो**—नाम दिन्ने पच्छा संथवं करेइ 'अमुगत्र २ यूयं दृष्टाः' इत्यादि च ।

१५—29. **सम्बन्धि-संथवो**—नात्रकयोजनम् । मायापियाइओ पुव्वसंबन्धि-संथवो; सासूससुराइओ [पच्छा]सम्बन्धि-संथवो । विज्जा ससाहणा । असाहणो मंतो । इत्थी-पुरिस-विसेसो वा । चुण्णो अंजणाइओ । पायपलेवाइओ जोगो । गर्भादानपरिसाडो मूलकम्मं ।

१५—31. शङ्कितं संभाविताधाकर्म्मादिदोषं भक्तादि। चतूरूपो भङ्गश्चतुर्भङ्गः–ग्रहणे भोजने शङ्कितः। भक्तादेर्ग्रहणकाले भोजनकाले च यदि पुनरमुकदोषवदिदमिति शङ्कावान्।१। ग्रहणे शङ्कितो न भोजने।२। भोजने शङ्कितो न ग्रहणे।३। न ग्रहणे न भोजने शङ्कितः।४। इति। एतेषां संभवो यथा–गृहस्थेन प्रचुरां भिक्षां भिक्षाचरेभ्यः स्वस्मै वा दीयमानं दृष्ट्वा चिन्तयति किं स्वगृहोपस्करतया साधुभिक्षाचरादिनिमित्तराद्धतया वा चेतसि शङ्कितः। ततो लज्जा-संक्षोभादिना एनमर्थं गृहिणं प्रश्नयितुमशक्नुवन् शङ्कितो गृह्णाति; शङ्कितस्तथैव भुङ्क्ते।१। द्वितीयस्तथैव चेतसि शङ्कितः तथैव गृहस्थं प्रश्नयितुमशक्नुवन् गृहीत्वा स्वोपाश्रये समागतस्ततो भोजनसमये तं दोलायमानचेतसं दृष्ट्वा अपरसाधुस्तद्भिक्षानिःशङ्कीकृतग्राही तदभिप्रायं ज्ञात्वा वदति यथा–साधोस्तद्गृहे प्रकरणं लाहणं वा समायातमिति—तद्वचः श्रुत्वा शुद्धमेतदिति निश्चित्य विगतशङ्कापरिणामस्तद्भुङ्क्ते इति द्वितीयः। गुरोः पुरतः स्वभिक्षातुल्यभिक्षामालोचयतः साधून् श्रुत्वा सञ्जातशङ्कश्चिन्तयति यथा—यत्स्वरूपा बह्वी मया भिक्षा लब्धा अमुकगृहे; अन्यैरपि तत्र तत्स्वरूपैव बह्वी लब्धा। ततो मा कदाचिदियमशुद्धा भविष्यतीति। तथा चासौ शङ्कितचित्तस्तां भुङ्क्ते इति तृतीयः। चतुर्थस्तु संभवं प्रतीत्य सुगम एव। अत्र द्वितीयभङ्गोऽपि ग्रहणापेक्षयैव सदोषः। परमार्थतस्तु शङ्कितग्रहणदोषस्य निवर्तितत्वाच्छुद्ध एव। तृतीयो बहुतरमदोषः। उभयत्रापि भोजनशङ्कितत्वेनाशुद्धत्वात्। अतः प्रथमतृतीयावाश्रित्य यत्प्रायश्चित्तं निरूपयति। यं कञ्चन दोषमाधाकर्मादिकं शङ्कते, संभावयति अमुकदोषमिति तत्सत्कं प्राप्नोति। संम्रक्षितमारूषितम्। निक्षिप्तं न्यस्तम्। पिहितं स्थगितम्। संहृतमन्यत्र क्षिप्तम्। दायग त्ति दायकदोषदुष्टम्। उन्मिश्रं पुष्पादिमिलितम्। अपरिणतं अप्रासुकीभूतादि। लिप्तं दुग्धादिखरंटितम्। छर्दितं परिशाटितम्। एते दश शङ्कितादय एषणादोषाः।

१५—33. अधुना म्रक्षितादीनाह—**सच्चित्ते**त्यादि। पृथिव्यब्वनस्पतिभिः सचित्तैर्म्रक्षितयोगात्। करमात्रं देयमपि सचित्तम्। अचित्तयोगादचित्तम्। तेन पृथिव्यादिभिः सचित्तैर्म्रक्षितं पृथ्विकायम्रक्षितमित्यादीनि तत्त्वम्।

१५—34. **हत्थेणं ति**। मत्ते वि एवं चेव। निर्मिश्रकर्दमं अपरिणतं सचेतनम्।

१६—2. **ससिणिद्धे**—तत्र स्निग्धमीषल्लक्ष्यमाणस्वरण्टनजलम्। हस्तादिउदकार्द्रं जलतीमितं तदेव।

१६—6. **गरहियमज्जाय[illegible] त्ति**—मांसवशाशोणितसुरामूत्रोच्चारादिभिः शिष्टजनस्याभक्ष्यापेयैः साक्षान्म्रक्षितं सत्। एतैर्म्रक्षिताभ्यां करमात्राभ्यां दीयमानं सत् यतीनामकल्प्यं उड्डाहादि दोषात्। संसक्तिमद्द्रव्यैर्द्रव्यादिभिर्लेपकृन्मध्वादिभिश्च हस्तमात्राभ्यां म्रक्षिताभ्यां देयं यदेतैर्दीयमानं म्रक्षितं तदकल्प्यमेकेन्द्रियादिवधदोषात्। मात्रादिलग्नमक्षिकाकीटिकापतङ्गादिसत्त्ववधदोषाच्चेति। गर्हितेऽगर्हिते च म्रक्षिते आयामम्।

१६—7. निक्षिप्तश्चतुर्भङ्गः—सचित्तं पृथिव्यादि सचित्ते पृथिव्यादौ निक्षिप्तं न्यस्तम् १. सचित्तं अचित्ते २. अचित्तं सचित्ते ३. अचित्तं अचित्ते ४. निक्षिप्तम्। अत्र प्रथमद्वितीयभङ्गयोर्ग्रहणप्रायोग्यद्रव्याभावान्न प्रायश्चित्तचिन्ता। चरमस्तु शुद्ध एव। अतस्तृतीयप्रायश्चित्तं निरूपयति—एत्थेत्यादिना—पृथ्वीकायो मृत्तिकालवणोषतूवरिकावर्णिकादिरूपः। अप्कायो जलावश्यायहिमकरकादि। तेजस्कायो मुर्मुराङ्गारादि। वायुर्गुञ्जावातादिरूपो दृतिस्थश्च। प्रत्येकवनस्पतिकायो धान्यव्रीहिकाहरिताम्रादिफलरूपः। अनंतः साधारणः सूरणगर्जरादिकन्दरूपः। त्रसाः कीटिकामत्कोटकन्थ्वादिरूपाः। एते च सर्वेऽपि पृथिव्यादयः सचित्ता मिश्राश्चात्र ग्राह्याः। ततः पृथिव्यादिषु त्रसान्तेषु निक्षिप्तं देयं वस्तु यदचेतनम्। अनन्तरमव्यवधानम्। परम्परं स्थगनिकादिना सव्यवधानम्। सान्तरं पृथिव्युपरि स्थगनिकादौ कृत्वा देयं मुक्तम्।

१६—12. **अणन्तवणस्सइ त्ति**—उल्ल्यादिरूपो। वीयनिक्खित्त इति प्रत्येकबीजेषु अणंतकायबीजेषु च अनन्तरपरम्परनिक्खित्ते देये नि०।

१६—13. **पिहिए चउभंगो त्ति**—यथा–सचित्तं सचित्तेण १. सचित्तं अचित्तेण २. अचित्तं [सचित्तेण ३. अचित्तं] अचित्तेण ४. पिहियं। अत्राप्यनन्तरपिहितपरम्परपिहितता वाच्या। तथा चतुर्भङ्गे—अत्रापि गुरुलघुपदाभ्यां चतुर्भङ्गः स्यात्, यथा–गुरुकं गुरुकेण, लघुकं लघुकेन, लघुकं गुरुकेण, लघुकं लघुकेन पिहितम्। गुरुकं भारिकं महद्देयभाजनम्। गुरुणा भारिकेण प्रहेडकादिना पिहितम्; गुरुकं लघुकेनाल्पभारेण छगनकादिना; लघुकं देयभाजनं गुरुकेण प्रहेडकादिना; लघुकं लघुकेन छगनकादिना पिहितं।

१६—13. सचित्तेण (पिहियं) इत्याद्यादिना तृतीयभङ्गस्य अचित्तं सचित्तेण पिहितमित्यस्य व्याख्या कृता। मण्डकादिकं सचित्तमृदावष्टब्धमनन्तरपिहितम्। तउआ मृत्तिका गर्भच्छब्जिका। अवष्टब्धं मण्डकादिपरम्परपिहितम्। (एवमप्कायादिभिरपि भावना कार्या। अस्मा[भि]रचितपिण्डविशु[द्धि]वृत्तौ दर्शितत्वाच्च।

१६—18. संहृतम्—येन मात्रकेण दात्री दास्यति साधोरशनादिकं—तत्र पृथिव्यादिकं तुषादिकं वा मत्स्या-स्तदन्यत्र सचित्ते अचित्ते वा क्षिप्त्वा तेन रिक्तीकृतेन यदि साधोर्ददाति तत्संहृतमशनाद्युच्यते। अत्र भङ्गचतुष्टयं—सचित्ते सचित्तं—सचित्ते पृथिव्यादौ, सचित्तं पृथिव्यादि संहृतम् १. अचित्तं तुषादि संहृतं २. अचित्ते सचित्तं ३. अचित्ते अचित्तं ४. संहृतं। अत्राप्यनन्तरपरम्परता वाच्या। परित्तवनस्पतिः पत्रशाकादिः। पृथिव्यादिषु त्रसान्तेषु सचित्तस्थानेषु संहरणे साध्वर्थं कृते मात्रकान्तेन गृहीतेऽशनादौ आ०। एकस्मादन्यत्र संहृत्य भूयोऽपि ततोऽपि अयोग्यं संहृत्य तेन ददतः परम्परसंहरणम्।

१६—22. बीभत्सा (रूप) तिलादिगोचरे।

१६—23. दायग(यारो)त्ति—मत्तो मदिरापानोत्थमदविकलः। उन्मत्तो महासङ्ग्रामादिजयाद्दर्पाध्मातो ग्रहगृहीतश्च।

१६—27. पम[द्द]माणा पृथिव्यादीन्। सेसेसु त्ति भङ्गेषु।

१६—29. आयसन्ती—द्रव्येण द्रव्यान्तरं गृह्णन्त्याः।

१६—30. परं च उ[द्दि]स्स त्ति—परकीयमिदमित्युक्त्वा ददाति। यद्वा यत्र दात्री परेण निर्भर्त्स्यते।

१६—31. उम्मीसं त्ति—मिश्रणस्योभयाश्रितत्वात्, उत्प्राबल्येन मिश्रितं दाडिमगुलिकादिना, पुष्पादिना वा सह यन्मिलितं तदुन्मिश्रं भण्यते। ते द्वे अपि वस्तुनी यत्रोन्मिश्र्य ददाति साधवे तदशनादिउन्मिश्रम्। तत्र परित्तवनस्पतिपत्रपुष्पशाकादिना सचित्तेन उन्मिश्रे आ०।

१६—31. अपरिणतं अप्रासुकीभूतादि। तच्च द्रव्यभावभेदात् द्विधा। पुनर्भावापरिणतं दातृगृहीतृयोगात् द्विधा वा। तत्र परिणतम(?) सचेतने दायकेन साधोर्दीयमाने द्रव्यापरिणतम्; दातृविषयभावापरिणतं तु द्वयोर्भ्रात्रोर्द्विस्वामिनोर्मध्यात् यत्राशने साधारणे एकेन दीयमाने द्वितीयस्य यत्र भावो अपरिणतो अभवनशीलस्तद्दातृभावापरिणतम्।

१७—1. द्रव्यभावपदाभ्यां चतुर्भङ्गोऽत्र अनिसृष्टभावापरिणतयोश्चासमक्षकृतो विशेषः। गृहितृविषयभावापरिणतं तु यत्र द्वयोः साध्वोर्भिक्षार्थं गतयोरेकस्य मनसि तदशुद्धं परिणतम्, अन्यस्य तदेव शुद्धं मनसि परिणतम्; तदपि भावापरिणतम्।

१७—2. [संसत्त]—संसक्तेन दध्यादिना करमात्रकखरण्टकेनाशनादिग्रहणे लिप्तदोषाः।

१७—3. पृथिव्यादिषु दीयमाने छर्दिते परिशाटितम्।

१७—5. संयोजणा-वाहिं भायणे त्ति। रसहेतुकद्रव्यं भिक्षाटने शाल्यादिकूरं क्षीरं वा प्राप्तवान्। तानि बहिरेव पृथक् भाजनेषु गृह्णातीति। वसतेर्बहिर्द्रव्यसंयोजनायां चेतसा क्रियमाणायां बाह्या द्रव्यसंयोजना। वसतावागतेन रसहेतोर्द्रव्यसंयोजना अभ्यन्तरा। संयोजना त्रिधा-पात्रकविषया, कवलविषया, मुखविषया च। यद्येन सह युज्यते तत्तेन सह भक्षयतीति भाव इत्यन्तर्वेदनाश्रया। 'बत्तीसकवलमाणं रागदोसाहिं धूमइंगालं। वेयावच्चाइया कारणमवहिंमि अइयारो ॥' कारणं वेदनावैयावृत्यादिषो(?)ऽनिर्वहति। भोजनाभावे आ०।

१७—9. सूत्रगाथा ३५-३६. एतद्व्याख्या-कर्मौद्देशिकचरिमत्रिके। पाषण्डिश्रमणनिर्ग्रन्थाख्ये पाषण्डिकर्मादिके कम्मे। आधाकम्मं। पाषण्डमिश्रे स्वसाधुमिश्रे च। बादरप्राभृतिका विवाहुस्सक्कण-ओसक्कणरूवा। सप्रत्यपायपरग्रामा-भ्याहृतम्। यत्रात्मविराधना। लोभपिण्डः। अइरं अणंत त्ति—तिरोऽन्तर्धाने, न तिरमतिरं अन्तर्धानं विना निरन्तरमित्यर्थः। अयं भावार्थः—अणन्तकाये पूयलियाई निक्खित्तं साहरियं मीसियं वा। अणंतकायेण वा पिहियं। आदिम ... अनन्तापरिणितऽनन्तच्छर्दिते च क्षमणम्। अनन्तकायाव्यवहितनिक्षिप्तपिहितसंहृतोन्मिश्राऽपरिणतच्छर्दितेषु क्षमणम्। रसहेतुसंयोजना-रागान्वितभोजने च, वर्तमानभविष्यन्निमित्ते च क्षमणम् ॥ जावंतिकाख्यकर्मौद्देशिकाद्यभेदः। मिश्रप्रथमभेदः। धात्रीत्वम्। दूतीत्वम्। अतीतनिमित्तम्। आजीवनापिण्डः। वनीपकत्वम्। ...

करणम् । क्रोधमानपिण्डौ । सम्बन्धिसंस्तवकरणम् । विद्यामन्त्रयोगचूर्णपिण्डाः । प्रकाशकरणं द्विविधम् । द्रव्यक्रीतम् ; आत्मभावक्रीतम् । लौकिकप्रामित्यपरावर्तने । निःप्रत्यपायपरग्रामाभ्याहृतम् । पिहितोद्भिन्नकपाटोद्भिन्ने । उत्कृष्टमालापहृतम् । सर्वाच्छेद्यम् । सर्वमनिसृष्टम् । पुरःकर्म । पश्चात्कर्म । गर्हिते द्रव्यम्रक्षितम् । प्रत्येकाव्यवहितनिक्षिप्तपिहित-संहृतोन्मिश्राऽपरिणतछर्दितानि । प्रमाणोल्लङ्घनम् । सधूममकारणभोजने चेति । अत्रेदं (अथे० b) सूत्रपदम्— कारणविवज्जे त्ति—कारणविवजओ नाम अकारणे भुङ्क्ते, कारणे न समुद्दिसइ । एतेषु आचाम्लं दीयते ।

१७—13. अज्झोयर [गाहा ३९] अध्यवपूरकान्त्यभेदद्वयम् । कडे त्ति कृतौद्देशिकभेदचतुष्टयम् । भक्तपानपूतिकम् । मायापिण्डः । अनन्तकायव्यवहितनिक्षिप्तपिहितादीनि । मिश्रानन्तकायाव्यवहितनिक्षिप्तानि चैतेषु एकभक्तम् । तथा ओघौद्देशिकमुद्दिष्टभेदचतुष्टयम् । उपकरणपूतिकम् । चिरस्थापितं प्रकटकरणम् । लोकोत्त[र]-परावर्तिकम् । लोकोत्तरअप्रामित्यं च । मंखमाइ परभावक्रीतम् । निःप्रत्यपायसप्रत्यपायस्वग्रामाभ्याहृतम् । दर्दरोद्भिन्नम् । जघन्यमालापहृतम् । उयरे पढमे त्ति—यावदर्थिकाध्यपूरकः सूक्ष्मचिगिच्छागुणसंस्तवकरणम् । तिगमक्खिय त्ति—मिश्रकर्दमेन लवणोत्कटिका च पृथिवीम्रक्षितम् । आउ उदल्लं । उक्कुट्ठरोट्टे परित्तो— एयं तिगमक्खियं । दायगो वहए त्ति—किं वेदायकवृत्तम् । यत उक्तम्—

बाले मूढे मत्ते उम्मत्ते वेविए य जरिए य । एए विसेसवज्जा एएसिं दायगो वहयं ॥

१७—15. पत्तेय० [गाहा ४२] पत्तेयवणस्सइकाए सचित्तपरंपरट्ठविए । तेण चेव पिहीए साहरिए मीसे परंपरनिक्खित्ते अणंतरनिक्खित्ते—प्रत्येकपरम्परनिक्षिप्तादीनि मिश्रानन्तरनिक्षिप्तसंहृतादीनि च । सर्वेषु पुरिमार्धम् । संकाए त्ति—जं दोसं आसंकइ तस्सेव दोसस्स जं पायच्छित्तं तं आवज्जइ ।

१७—16. इत्तरठविए० [गाहा ४३] करमात्रस्थं इत्वरस्थापितम् । सूक्ष्मप्राभृतिका सस्निग्धसरजस्कम्रक्षितम् । पृथ्वीअप्वनस्पतिम्रक्षितम् । पृथिव्यादिषु मिश्रेषु परम्परनिक्षिप्ते नि० । वनस्पतिमिश्रे परम्परनिक्षिप्ते नि० । प्रत्येकबीजेष्वनन्तकायबीजेषु वानन्तरपरम्परनिक्षिप्ते । एवमेतेषु स्थापितेऽपि देये नि० । अविगई—निर्विकृतिकम् । ठवियगाईसु त्ति—आदिग्रहणान्मिश्रपरम्परपिहिते नि० । एवं संहृतेऽपि । परित्तवणस्सइओमीसे नि० । वीउम्मीसे नि० ।

१७—19. अतिप्पमाणे व त्ति—तेष्वेवातृप्यमानस्तदेवातिमात्रं पुष्टतया कुर्वन् ।

१७—20. संघरिसेण—होइया ।

१७—21. जमलिओ—जमलतया स्थितः ।

१७—22. वट्टा गोलया । समास त्ति समस्या ।

१७—24. अरहट्टादिसत्क आजीवे रुतेऽपि क्रियमाणे खमणं ।

[गाथा ४६] अन्यच्चोच्यते—जिणकप्पिया थेरकप्पिया य दुविहा साहुणो । ओहीय–ओवग्गहीय–भेया दुहा उवही । तत्थ—

ओहेण जस्स गहणं भोगो पुण कारणा स ओहोही (ओघोपधिः) । जस्स य दुगंपि नियमा कारणओ सो उवग्गहिओ ॥

—जिणकप्पिया उपध्यपेक्षया । अष्टविधोपधयः—

बिय त्ति चउक्क पणगं नव दस एक्कारसेव बारसगं । एए अट्ठ विअप्पा उवहिंमि उ होंति जिणकप्पे ॥
रयहरणं मुहपोत्ती दुविहो कप्पेक्कजुत्त तिविहो उ । रयहरणं मुहपोत्ती दुकप्प एसो चउद्धा ओ ॥
तिन्नेव य पच्छागा रयहरणं चेव होइ मुहपोत्ती । पाणिपडिग्गहियाणं एसो उवहीओ पंचविहो ॥
पत्तगधारीणं पुण नवाइभेया हवंति नायव्वा । पुव्वुत्तोवहिजोगा जिणाण जा बारसुक्कोसो ॥
पत्तं पत्ताबंधो पायट्ठवणं च पायकेसरिया । पडलाइ रयत्ताणं च गोच्छओ पायनिज्जोगो ॥
तिन्नेव य पच्छागा रयहरणं चेव होइ मुहपत्ती । एसो उ दुवालसविहो उवही जिणकप्पियाणं तु ॥
एए चेव दुवालस मत्तय अइरेगचोलपट्टो य । एसो उ चउद्दसविहो उवही पुण थेरकप्पंमि ॥
उक्कोसो अट्ठविहो मज्झिमओ होइ तेरसविहो य । अट्ठो चउव्विहो बिय अज्जाणं एस तिविहुवही ॥
कप्पतिय पडिग्गहगो अब्भिंतर बाहिरा नियंसणिया । संघाडी खंधकरणी उक्कोसो एस अट्ठविहो ॥

मध्यमश्चाय त्रिविधः—

पत्ताबंधो पडला रयहरणं मत्तकमड रयत्ताणं । उग्गहपट्टोरुचलणिया ओकच्छि कंचु वेकच्छी ॥

गा अपत्तट्ठवणं मुहणंतगकेसरि जहन्नो । जघन्योपग्रहिकः स्थविराणां एसो ।

तत्थ पीढगं ति काष्ठच्छगणमयं पीठं निसेज्जं पाउंछणं । दंडगा-पमज्जणी दंडापुंछणी । घट्टगा पात्रघर्षणोपलाः । वर्षावृष्टिषु त्राणाय रक्षणाय । वाल त्ति कम्बलः । सूत्रमयम् । सूई—तालपत्रसूच्यादिक्षुम्पकः । कुडसीसगं पलासपत्रमयं क्षुम्पकम् । पत्रकं वंशमयम् । सेसतिगं वालसौत्रिकादन्यत् । वासत्ताणे त्ति— वर्षाकालोपयोगिसंस्तारो अझुसिरो काष्ठफलकादि । झुसिरस्तृणादिमयः । डंडेत्यादि—तत्थ

लट्ठी आयपमाणा, विलट्ठी चउरंगुलेण परिहीणा । दण्डो बाहुपमाणो, विदण्डओ कक्खमेत्तो उ ॥ सिरसो उवरि चउरङ्गुलदीहा नालिया । अवलेहणी वटादिकाष्ठमयी पादलेहणी—'वडउंबरे पिलक्खू तस्स अलाभंमि चिंचिणीया ।' चर्मत्रिकम् । अत्थुर त्ति भूमावास्तीर्यते अभ्यादिभये प्रलंबादिविकरणाय च । पाउर त्ति वद्ध[पदि]कादिभये यत् प्राम्रियते । तलिगा उपानहः । यद्वा कृत्तिः तलिगा बध्राः (वध्राः b) यद्वा विहारे उपकरणस्य शरीरेण सह बन्धनार्थः पट्टः । पल्हत्थी योगपट्टः । मध्यम औपग्रहिकः । वारगो त्ति—ससागारिके उदगनिमित्तं, नित्यं जनमध्य एव तासां वासात् । उत्कृष्टौपग्रहिकस्तूच्यते—

अक्खा० गाहा [१८–5.]—संथारको द्विविधः—एकाङ्गस्तिनिसकाष्ठपट्टरूपः, तदितरः कम्बिकादिमयः । उत्सर्गपदापेक्षया द्वितीयपदमपवादसूत्रोत्कृष्टौपग्रहिकः कथ्यते । पुस्तकपञ्चकं—'गंडी, कच्छवी, मुट्ठी, संपुडफलए तहा छिवाडीय त्ति'—एतत्त्रयमग्रे कथ्यिष्यते । फलगं ति पट्टिका, समवसरणफलकं वा । कमढगं निजोदरमानं तत् प्रतिसंयतिनीनां , अन्यथा एकभाजनभोजने गुरुकवलोत्पाटने एकया अन्यस्या अप्रीतिसंभवः स्यात् ।

१८—9. आ[illegible]णंतगं—तौ सदृशम् । पट्टस्तद्बन्धनम् ।

१८—11. साहूणं ओहिओ त्ति—मुहपोत्तीयपायकेसरियाइओ चउरो ते चेव त्ति । पडिग्गहो प्रच्छादनत्रयम् । अन्ने य त्ति—अब्भिंतर नियंसणी १, बाहिनि० २, संघाडी ३, खंधकरणी ४; पत्ताबंधो, पडला, रयत्ताणं, रयहरणं च ४; जघन्यमध्यमोत्कृष्टभेदतः प्रागुक्तत्रिविधोपधिर्मध्याज्जघन्यविच्युतलब्धत्वे नि० । मध्यमस्य विच्युतलब्धत्वे पु० । उत्कृष्टस्य विच्युतलब्धत्वे ए० । जघन्याप्रत्युपेक्षितत्वे नि० । एवं मध्यमाप्रत्यु० पु० । उत्कृष्टाप्रत्यु० ए० । न पडिलेहिओ त्ति—निवेदयितुं गुरुभ्यो विस्मृतत्वे जघन्यस्य नि० । मज्झिमे पु० । उत्कृष्टस्य ए० । प्रकारत्रयेण सर्वस्योपधेः संपन्नत्वे आ० ।

१८—21. हारिय० [गाहा ४७]—हारितत्वे जघन्यस्य ए० । मध्यमस्य हारितत्वे आ० । उत्कृष्टस्य हारितत्वे क्षमणम् । जघन्यधौतत्वे ए० । मध्यधौतत्वे आ० । उत्कृष्टस्य धौतत्वे उ० । उपधेर्जघन्यादिभेदस्योद्गमं कर्तुं न निवेदयते तत्रापि ए० । आ० । च० । आचार्यैरदत्तं परिभुङ्क्ते । त्रिविधमुपधिं आचार्यानुज्ञां विनाप्यन्यस्मै ददाति । ए० । आ० । च० । सव्वंसि छट्ठं तु त्ति—जघन्यादिभेदतस्त्रिविधस्य हारणे......त्र द्वेऽपि काले बत्थप्र[illegible]लनादा षष्ठं स्यात् ।

१८—30. मुहणंतय० [गाहा ४८] एवं तावेत्या[illegible] । तिविहोवहिणो विमु(चु)येत्यादि [गाहा ४९] रजोहरणमुखवस्त्रिकां विहाय अन्योपधौ द्रष्टव्यम् । अत्रप्रति अत्रया उक्तं (?) । तत्र मुहपोत्तियाए पडियाए लद्धाए य निव्वियं । एवं रयहरणे वि । यदि पुनर्द्वितयमपि पतितमथ च न लब्धं तत्राह—अह [illegible]त्यादि । नवरं नासियं परचक्रादिसम्पातेन । हारियं आलस्यादिना प्रमादेन ।

१८—31. काल० [गाहा ४९]

पारि[illegible]त्ति—33. स्थण्डिलाद्यशुद्धया ।

१८—34. विकालवेलायां पानकाहारस्याप्रत्याख्यानत्वे भोजनोर्ध्वमुत्सर्गतश्चतुर्विधाहारस्यापि प्रत्याख्यानत्वं युक्तम् । तदकरणे—अत एव साधवस्त्रिविधा[illegible]रं स्वाध्यायकरणसमये तृतीयपौरुष्याः समये प्रत्याख्यान्ति । विकालवेलायां च पानकाहारमिति ।

१९—1. एवं विय० [गाहा ५१] द्वादशविधतपो यथा—

अनशन-मौनदरिता, वृत्तेः संक्षेपणं रसत्यागः । कायक्लेशः संलीनतेति बाह्यं तपः प्रोक्तम् ॥

प्रायश्चित्तध्याने वैयावृत्त्यविनयावथोत्सर्गः । स्वाध्याय इति तपः षट्प्रकारमाभ्यन्तरं भवति ॥

मासाई सत्त ता पढमा बिइतइयसत्तराइदिणा । अह राइ एगराई, भिक्खू पडिमाण बारसगं ॥

इह प्रतिमादिविषयेऽश्रद्धाने विपरीतप्ररूपणायां वा प्रायश्चित्तं ज्ञेयम् । एतेन तपोतिचारप्रायश्चित्तसूत्रा द्व्याद्यभिग्रहेषु च वीर्यातिचारप्रायश्चित्तसूत्रनं ज्ञेयम् । पाक्षिके पुरुषादिविभागतो ज्ञातव्यम् । पुरुषाः क्षुल्लक स्थविर भिक्षु उपाध्याय आचार्यभेदतः पञ्चधास्तान् प्रति चूर्णिकृता दर्शितमेव ।

१९—10. फिडिए० [गाहा ५२] निद्राप्रमादवशतो गुरुभिः सह प्रतिक्रमणे **फिडिओ** त्ति न मिलितः । **सयं वा** [illegible] गुरुणा अपारिते कायोत्सर्गे स्वयमात्मैव पारयति । अपूर्णे वा चिन्तनीयतयान्तराले पारयति ।

१९—15. अकए० [गाहा ५३] **एवं वंदणाइएसुं पि** त्ति—एकद्वित्रिसर्वा अदानतो वन्दनेषु यथाक्रमं नि० । पु० । ए० । सर्वाकरणे आयामं । **राओ वोसिरइ** त्ति निसिसंज्ञोत्सर्गं कुरुते ।

१९—17. कोट्टे० [गाहा ५४] **सगि** त्ति—सकृत्, एकदा । **तन्नग** [illegible] त्ति तर्नको वत्सकः, आदिशब्दात् मयूरादिग्रहः ।

१९—22. अज्झुसिर० [गाहा ५५] दुःप्रत्युपेक्षितं चक्षुषा सम्यगनवलोकनम् । अप्रत्युपेक्षितं सर्वथा चक्षुषाऽनिरीक्षितम् । **कोयवि**—रूतपूरितः पटः पुरओढीति यदुच्यते । पावारगो बृहत्कम्बलः परियच्छिर्वा । **पूरी**—पल्हवी हस्त्यास्तरणम् । दढगालिर्धौतपोतिः । दुसर सूत्री पटी, दोयडी यावत् । विरालि नवओ जीणोत्ति भणइ । गंडोवहाणी गल्लमसूरिका । पुस्तकपंचके गंडी पुस्तकस्वरूपम्—

बाहल्लपुहत्तेहिं गंडीपोत्थो उ तुल्लगो दीहो । १ ।
कच्छवि अंते तणुओ, मज्झे पिहुलो मुणेयव्वो । २ ।
चउरंगुलदीहो वा, वट्टागी मुट्ठिपुत्थगो अहवा ।
चउरंगुलदीहो चिय, चउरंसो होइ विन्नेओ । ३ ।
तणुपत्तूसियरूवो होइ छिवाडी य पोत्थगा नाम ।
दीहो बाहुल्लो (ल्लो) वा जो पिहुलो होइ अप्पबाहुल्लो ।
तं मुणियसमयसारा छिवाडि पोत्थी भणंतीह । ४ ।
संपुडगो दुगमाई फलगा । ५ ।

अपरमपि—चर्मपञ्चकं यथा—**तलिगा खल्लग वब्भे (वद्धे) कोसग कत्ती य बीयंतु** ।

तलिगा-उपानत्, वब्भः-वध्रः, कोसगो-लेहोधारं चर्म, कृत्तिः प्रलम्बकरणाय ।

१९—32. ठवण० [गाहा ५६] **सन्नी**—अविरतः श्राद्धः । वीर्याचारातिचारो निजवीर्यगूहनम् ।

१९—35. [illegible]**यववहाराइसु अत्तह** त्ति—मायानिष्पन्नं तदेव दीयते इति विशेषः । आसणद्वयं देयमिति भावः । **अजमायाओ** त्ति—"लहुवित्ती महाभोगो, एस साहू जिइंदिओ । रसचागं करेइ त्ति, अंतपंतेहिं वाडए ॥" इत्यात्मनि व्यापयति ।

२०—3. दप्पेण० [गाहा ५७] वल्गनं-उल्लनम् । खडयप्पयाणं धावणम् । खड्डावरंडाईण फड्डणम् । मल्लवद्बाहास्फोटनं च दर्पः । तं कुर्वतो कदाचित्पञ्चेन्द्रियस्य [व्य]परोपणं—विघातः कृतः स्यात् ।

२०—4. अङ्गादानं-मेहनं तस्य परिमर्दनेन शुक्रपुद्गलनिर्घातनं-निष्काशनं इत्येतत्संक्लिष्टकर्मोच्यते । आदिग्रहणाल्लिङ्गस्य लेहादि[ना] म्रक्षणादि करोति । दीर्घाध्वनि यत्सेवनम् ।

आधाकर्म, अध्वानकल्पादिकं वा शुष्ककदलीफलादिचरणतः । दीर्घग्लानेन वा सता यदाधाकर्मरसादिकारणतः । सन्निधिसेवनं वाचरितम् । तत्रैतेषु पञ्चकल्याणकमिति वक्ष्यमाणगाथान्तोक्तं ज्ञेयं योज्यम् ।

२०—7. [illegible]**रमचा०**-भिक्षापात्रं तत्काले न प्रतिलेखयति । चरिमभागोनायां पौरुष्यां प्रथमायां पादोनप्रहरे इत्यर्थः । यद्वा चरिमपौरुष्यामुपोषितः कश्चित् । ततोऽसौ तस्यां पात्रं न पडिलेहेइ । तत्र कल्याणकं प्रायश्चित्तं ज्ञेयम् । चातुर्मासे सांवत्सरिके च शुद्धौ पञ्चकल्याणकं ज्ञेयम् । यस्मात्सूक्ष्मातिचारान् कृतान् न जानाति न च स्मरति । **कथमित्याह—जहा पाडले इत्यादि** ।

२०—12. छेयाइ० [गाहा ५९] किं वा छिज्जइ त्ति—भो भो जना निरीक्षत निरीक्षत । छियते न छियते चेति भवति अश्रद्धानपरः। मिउणो त्ति—मृदोर्निरभिमानस्य । अभिमानाभावं दर्शयति–जो इत्यादिना । छेदाऽश्रद्धानपरस्य मृदोः, पर्यायगर्वितस्य च इत्येतेषाम् ।

२०—18. दुगुण्ठाः–उत्कण्ठाः खिन्नाः। इह शिष्या अनेकविधा भवन्ति—परिणामगा, अपरिणामगा, अइपरिणामगा। तत्थ उस्सग्गे उस्सग्गं, अववाए अववायं, जहा भणियं सद्दहंता आयरंता य परिणामगा भण्णन्ति । अपरिणामगा पुण जे उस्सग्गमेव सद्दहंति आयरंति य; अववायं पुण न सद्दहंति नायरंति य । अइपरिणामगा जे अववायमेवायरंति, तम्मि चेव सज्जंति न उस्सग्गे । अतो अपरिणामकानां उत्सर्गदृष्टीनां मा निन्द्यो भविष्यति । चशब्दसूचित-कुलगणसङ्घाधिपानामपि छेयापन्नानां जीतेन तप एव दीयते न छेदादयः ।

२०—19. जं जं० [गाहा ६०] अत्थपय त्ति—अर्थः सूत्रव्याख्यानं भाष्यचूर्णिनिर्युक्त्यादिकम् । आज्ञाभङ्गादिदोषतः प्रायश्चित्तापत्तिः सविस्तरा तपस उक्ता ।

२१—5. दव्वं खित्तं० [गाहा ६४]

आहाराई दव्वं खेत्तं लुक्खाइ काल गिम्हाई । हट्ठाई भाव त्ती पुरिसं गीयाइ जाणित्ता ॥

आउट्टि–पमाय–दप्प–कप्पस्वा चउव्विहा पडिसेवणा नायव्वा । साहारणेसु द्रव्यादिषु साधारणं भणिय समं देज्जा ।

२१—13. लुक्खं० [गाहा ६६] वायं ति—वातलम्। अनूपक्षेत्रं सजलक्षेत्रम्। एवं कालम्मि तिविहे त्ति—वर्षाहेमन्तग्रीष्मरूपः कालः सामान्येन स्निग्धरूक्षश्च भवति । तत्र स्निग्धः–शीतः, रूक्षः–उष्णः। अयं स्निग्धोऽप्युत्कृष्टमध्यमजघन्यभेदात्त्रिधा; रूक्षोऽपि च त्रिधा । तत्र उत्कृष्टस्निग्धोऽतिशीतः, मध्यमस्निग्धो नातिशीतः, जघन्यशीतः स्तोकशीतः । जघन्यरूक्षः किंचिदुष्णः, [मध्यमरूक्षो नात्युष्णः,] उत्कृष्टरूक्षोऽत्युष्णः । एवं च—

गिम्हासु चउत्थं देज्जा छट्ठं च हिमागमे । वासासु अट्ठमं देज्जा तवो एस जहन्नओ ॥
गिम्हासु छट्ठं देज्जा अट्ठमं च हिमागमे । वासासु दसमं देज्जा एस मज्झिमओ तवो ॥
गिम्हासु अट्ठमं देज्जा दसमं च हिमागमे । वासासु दुवालसमं एस उक्कोसओ तवो ॥

एस नवविहो ववहारो ।

२१—21. सो य इमो त्ति सुयववहारो । आपत्तिः प्रायश्चित्तयोग्यता विषया । तपसा द्वादशादिना, कालेण वर्षादिना । अहागुरू—गुरुतम इत्यर्थः । अहालहू—लघुतमः ।

२१—28. अहाणुपुव्वीए—इत्यस्य व्याख्येयम्—[illegible]साणुसारेणेति ।

२१—29. चउमासगहणेण लहु चउमासो वि दट्ठव्वो । 30 छम्मासा—छम्मासग्रहणात् लघुषण्मासोऽपि ज्ञेयः । प्रतिपत्तिः आपत्तिः । 31 तीसा य त्ति—स्थूलतया उक्तम्, अन्यथा सार्धसप्तविंशतिर्वक्तुमुचिता । 33 प्रागुद्दिष्टानि गुरुकादीनि व्याचष्टे गुरुगं चेत्यादिना ।

२२—2. एतदशक्तः मिथ्यादुष्कृतेन शुध्यति । अत एवोक्तम्—सुज्झेव त्ति ।

२२—4. सामान्य एव श्रुतव्यवहार उक्तो विस्तरेणाधुना प्राह—तिग[illegible]वेत्यादिना ।

२२—9. गुरुपक्खो उक्कोसो त्ति—यथा गुरुपदादिवाच्यः गुरु[:] गुरुतरो गुरुतमः। एव(स)लहुगे वि—उत्कृष्टादिभेदत्रयम्—उक्कोस–उक्कोसे, उक्कोस–मज्झिमो, उक्कोस–जहन्नो[त्ति] उत्कृष्टे भेदत्रयम् । मध्यमेऽपि भेदत्रयम्—उक्कोसो, मज्झिम जहण्णो त्ति । जहन्नुक्कोसे, जहन्न मज्झ, जहन्न जहन्न इति जघन्ये भेदत्रयम् ।

२२—25. एमेव कालाइ त्ति—लघुतरमध्यमपञ्चविंशतौ नवविधआपत्तिदानपञ्चमगृहनिवेशितायां अट्ठम-छट्ठ-चउत्थ-उक्कोसा देय तिह भिन्नं । मध्यमे उत्कृष्टम्, मध्यममध्यमम्, मध्यमजघन्यमिति योज्यम् । तृतीय नवकलहुस सरकससमगृहनिवेशितपञ्चदशा गोचरपङ्क्तौ अट्ठम-छट्ठ-चउत्थ-योज्यम् । लहुसतरमध्यमदशके अष्टमगृहनिवेशिते । २ । आ० । यथा लघुसजघन्य[illegible] नवगृहे । उ० १; आ० १, ए० । समणायामेक्कासणे त्ति 33 वाचोक्तं योज्यम् । सप्तविंशतिभेदेषु वर्षासु दानमुक्तम् ।

२३—1. अधुना [illegible]तकालाश्रितं दानमाह—सिसिर इत्यादिना । दसमं उववासचतुष्टयम् । आदौ कृत्वा ।

२३—2. अक्कंतीय तह चेव त्ति—तत्रार्धस्यासमप्रविभागरूपस्य एकदेशस्य वा एकादेशलक्षणस्य-अपक्रमणमवस्थानम्। शेषस्य बुध्यादिपदसङ्घातरूपस्यैकदेशस्योर्ध्वं गमनं यस्यां रचनायां सा समयपरिभाषयार्धापक्रान्तिरुच्यते। यथा सिसिरे जघन्यतः षष्ठम्, मध्यमतोऽष्टमम्, उत्कृष्टतो दशमम्। २। ३। ४। एषां मध्यादेकदेशः षष्ठलक्षणोऽपक्रामति अवतिष्ठते। अष्टम-दशमे ऊर्ध्वं वर्षासु गच्छतः। तृतीयं तु अप्रेतनं[द्वाद]शं मील्यते। ततश्च जघन्यतोऽष्टमम्, मध्यमस्तु दशमम्, उत्कृष्टस्तु द्वादशं तपो वर्षासु कुर्वन्ति।

२३—3. अट्ठममाइ गिम्हे इत्यादि—अष्टमं उपवासत्रयमादौ धृत्वा निव्वीयं पर्यन्ते यथा-लघुस पञ्चकसत्के नवमगृहे। सयासय त्ति—स्वकीयाः सदा ज्ञेया आपत्तयः। असहोरेकैकं...सत्त्वावस्कार्यः यावत् स्थितमेकैकम्। उ०। आ०। ए०। नि०।

२३—8. परट्ठाणं देज्ज त्ति—आधाकर्माद्यासेवाप्राप्तम्। इह नवविधश्रुतव्यवहारे वर्षा-शिशिर-ग्रीष्मरूपकालतया सप्तविंशतिभेदेषु आपत्तिदानं दर्शितम्। अर्धापक्रान्तिरपि तथा वाच्या।

२३—14. कालं वा सहेज्ज त्ति—प्रतीक्षेत।

२३—16. अणहीयनिसीहो अग्गीयत्थो। इतरो गीतार्थः।

२३—21. धिइ धृतिश्चेतसोऽवष्टंभः। संहननं वज्रर्षभनाराचादि। धीईए संघयणेण य संपन्नो पढमो; न धिईए न संघयणेण य अन्त्यः; मध्यवर्ति द्वयम्—धृत्या न संहननेन, न धृत्या(न धृत्या)संहननेन सम्पन्न इति द्वयमतो वाच्यम्।

२३—25. विकल्पपञ्चकमपि व्याचष्टे आयतरगो इत्यादिना—जो जं तवोकम्मं आढवेइ तन्नित्थरइ स आयतरगः। दृढोऽपि वैयावृत्त्ये तप एव करोति न वैयावृत्यम्-इत्यायतरगः। परतरस्तपस्यपि शक्तः परं न करोति, किन्तु वैयावृत्यमेव विधत्ते। पञ्चमभङ्गव्याख्यामाह—अन्नतरत ग(27)इत्यादिना।

२३—30. कल्पस्थितादयः सर्वेऽष्टौ ८। कल्पोऽवस्थितसमाचारः। तत्र स्थितास्तत्परिपालनोद्यताः।

२३—33. कयरे ते दशभेदा?—इमे वक्खमाणा—(१)अविद्यमानं चेलं वस्त्रं यस्यासावचेलकस्तद्भाव आचेलक्यम्। सचेलत्वेऽप्यचेलव्यपदेशः। दृश्यते च विवक्षितवस्त्राभावे सचेलत्वेप्यचेलव्यवहारः। यदाह—

'जल(ह)जलमवगाहंतो बहुचेलो वि सिरिवेढियकडिल्लो। भन्नइ नरो अचेलो तह मुणओ संतचेलावि॥
तह थोवजुन्नकुच्छियचेलेहिं वि भन्नए अचेलो त्ति। जह तर सालिय लहुं देयो त्ति नग्गि यामो त्ति॥'

(२)उद्देसेन साधुसंकल्पेन निर्वृत्तमौद्देशिकं आधाकर्म। (३-४) सय्यया वसत्या तरति संसारमिति शय्यातरः। स च राजा नृपश्चक्रवर्त्यादिस्तयोः पिण्डः समुदानमिति शय्यातरराजपिण्डः। (५) कृतिकर्म वन्दनकम्। (६) तथा व्रतानि महाव्रतानि। (७) ज्येष्ठो रत्नाधिकः। (८) प्रतिक्रमणं आवश्यककरणम्। (९) मासः मासकल्पः। (१०) परि-सर्वथा वसनमेकत्रनिवासः स निरुक्तविधिना पर्युषणम्। इति दशविधः कल्पो भेदः। तंमि ठिया पकप्पट्ठिया—दशविधकल्पे स्थिता इत्यर्थः। अत्र च प्रथमचरमजिनसाधवो दशस्वपि स्थिता एव। द्वाविंशतिमध्यमजिनसाधवो विदेहजाश्च दशकमध्यात् शय्यातरपिण्डचातुर्यामपुरुषज्येष्ठवन्दनकरणाख्यचतुर्षु स्थिताः, षट्सु चास्थिताः। यथा आचेलक्यौद्देशिकप्रतिक्रमणराजपिण्डमासपर्युषणाकल्पे च वर्षाकालसमाचारा मध्यमजिना २२ विदेहजाश्चास्थिताः, सततसेवनीयतया। दशानां मध्यात् कानिचित् स्थानानि कदाचिदेव पालयन्तीत्यनियतव्यवस्थास्वभा[वा]स्ते; अतो मध्यमजिनसाधवो महाविदेहजाश्चाकल्पस्थिताः। यतोऽनवस्थितसमाचारोऽकल्पोऽभिधीयते।

२४—4. जोगवियसरीर त्ति—परिकर्मितदेहाः।

२४—11. ब[हु]तरया भिन्न[ग]णो त्ति—बहवः बहुभेदा इति भावः। अत्र आचार्यकृतकरणादि-पुरुषविभागेन श्रुतव्यवहारतो जीतकल्पयन्त्रं विलेख्यम्। 'एयं मज्झं गहियं'त्ति अनया गाथया यन्त्रकमध्यवर्ति पंचमपंक्तितपोगृहीतपंचमपंक्तावेवास्या गाथाया अर्थो निपततीत्यर्थः।

२४—14. तिरियाय[ए]—तिर्यग्दीर्घाणि त्रयोदशगृहाणि कृत्वा अहो एगं घरयं च—वामपार्श्वे एकं पंक्तिमित्यर्थः। अहो एक्कक्कघरय ठाविय वामपार्श्वतः सव्वाईए निरवेक्खं जिनकल्पिकं विनस्येत्। द्वितीयपंक्तेरुपरि

आचार्यः कृतकरणः । तृतीयपंक्तेरुपरि आचार्योऽकृतकरणः । चतुर्थ्यां उपाध्यायः कृतकरणः । पञ्चम्या उपाध्यायोऽकृतकरणः [षष्ठ्या गीतार्थस्थिरकृतकरण] भिक्षुः । सप्तम्या गीतार्थस्थिराकृतकरणभिक्षुः । अष्टम्या गीतार्थास्थिरकृतकरणभिक्षुः [नवम्या गीतार्थास्थिराकृतकरणभिक्षुः । दशम्या अगीतार्थस्थिरकृतकरणभिक्षुः । एकादश्या अगीतार्थस्थिराकृतकरणभिक्षुः । द्वादश्या अगीतार्थास्थिरकृतकरणभिक्षुः] त्रयोदश्या अगीतार्थास्थिराकृतकरणभिक्षुः । एवं स्थापितदाहिणड्डियपणुवीसइ सक्ख भिन्नमास निव्वीयसमियाओ, वामपार्श्ववर्ति अट्ठमभत्तं तत्थ छग्गुरुसमियं जीतदाणं नेयं । पंचमपंतीए ।

२५—11. तहिं चेव अवराहे त्ति कोऽर्थः ? तदेवापराधमाश्रित्येत्यर्थः । पुरुषाः—आचार्योपाध्यायवृषभभिक्षुक्षुल्लकभेदतः पञ्चविधास्तानाश्रित्येति भावः ।

२५—25. खित्तं छिन्नमडंबं त्ति—अर्द्धतृतीययोजनाभ्यन्तरे जत्थ वसिमं अन्नं नत्थि तं छिन्नमडम्बं । सर्वतोऽऽसन्नसन्निवेशान्तरं मडंबमित्यन्ये । ओमं परिपूर्णं यत्र भक्तादि न लभ्यते । दुर्भिक्षं यत्र सर्वथा न लभ्यते ।

२५—27. तमणंतरं ति निकटवर्ति ।

२५—36. आलोचनाकाले जया गूहइ त्ति—सर्वथैव न प्रकाशयति । पलिउंचइ व त्ति—अर्धकथितं करोति ।

२६—1. बहुगुणेसु त्ति—समर्थेषु । पडिसेवा—अशुभं प्रति प्रधानसेवा ।

२६—8. छेदार्हं प्रोच्यते—तवगव्विउ० गाहा । [८०]

२६—11. अपरिणामगो—अपवादरुचिः ।

२६—12. उत्कृष्टां तपोभूमिं समईओ त्ति—अधिकतपोदानयोग्यो जातः । सवि (साव०) शेषं च यस्य चरणं तस्यातिचारदूषितव्रतपर्यायस्य च्छेदः क्रियते ।

२६—23. आकुट्टिरुपलक्षणम्, तया पञ्चेन्द्रियवधः कृतः । दर्पेण मैथुनसेवनं च । [illegible] नाशयामीति बुद्ध्या स्त्रीसेवनायाम् । मृषावादे कूटसाक्षित्वादिदानतः । अदत्ते निधानाद्यपहरति । सचित्ताचित्तगोचरं परिग्गहं च गृह्णाति ।

२६—27. मूलगुणान् द्वित्र्यादिभेदेन बहुविधानं बहुशो अनेकशः शोधयति । सर्वशंकादीन् करोति । इति दर्शनवमकः ।

२६—32. गृहस्थलिंगं—कच्छाबन्धनं तल्लकट्टशिरसि विधानादि कौतुकेन कुरुते । अन्यतीर्थिकाः—शाक्यतापसादयस्तेषां लिङ्गं तद्वेषकरणं नटादिवेषकरणतः । स्त्रीणां गर्भस्याधानं शाटनं च औषधादिकरणतो मूलकरणतोऽमी (?) ।

२६—34. विहियतवे त्ति—विहितं दत्तं गुरुणा तपो यस्य सविहिततपास्तदूर्ध्वं छेदमूलानवस्थाप्य पाराञ्चिकानि प्राप्तस्यापि भिक्षोर्मूलमेवेत्यर्थः । तथा आचार्योपाध्याययोः पाराञ्चिकप्राप्तावप्यनवस्थाप्यमेव भवति । यदुक्तं भाष्ये—

'इत्थ य जइ नवदसमे आवन्नस्सावि भिक्खुणो मूलं । दिज्जइ तहाभिसेगे परं पयं होइ नवमं तु ॥'

२७—5. अनवस्थाप्याख्यं । अनवस्थाप्ये उक्कोसं० गाहा । [८७]

आसेवितातिचारसन्नविशेषः । सन्न अनाचरिततपोविशेषस्तद्दोषोपरतोऽपि महाव्रतेषु नावस्थाप्यते नाधिक्रियत इत्यनवस्थाप्यः । तदतिचारजातं तच्छुद्धिरपि वा अनवस्थाप्यमुच्यते । नवमं प्रायश्चित्तम् । तत्र स्तैन्यकरणे किं सूत्रेऽनवस्थाप्यमुक्तम् ? उक्तमेवेत्यादि ।

तओत्यादि—गाथापूर्वार्द्धेन साधर्मिकस्तैन्ये प्रायश्चित्तमुक्तम् । तत्र सूत्रपदस्यायमर्थः—साधर्मिकाः साधवस्तेषां सत्कस्योत्कृष्टोपधेः शिष्यादेर्वा । बहुशो वा प्रद्विष्टचित्तो वा । तेणं त्ति—स्तेयं-चौर्यं कुर्वन् अनवस्थाप्यः ।

अन्यधार्मिकाः—शाक्यादयो गृहस्था वा । तेषां सत्कस्योपध्यादेः स्तेयं कुर्वन् । अयमर्थोऽन्यधार्मिकयोः किञ्चित्स्वरूपयाः सत्कं स्तेयमाहारोपधिशिष्यादिगोचरं त्रिधातत्कुर्वन् । अथोत्तरार्धेन—[illegible] गहिओ-स य त्रिधा—अत्थायाणं दलमाणे, हत्थालंबं दलमाणे, हत्थायालं दलमाणे त्ति । क्रमेण व्याख्या—

अत्थायाणं—अर्थादानं द्रव्योपादानकरणं अष्टाङ्गनिमित्तं तदुपलक्षणमिति इत्यर्थः । अत्र कथानकमात्रम्—

उज्जेणी उस्सन्नं दो वणिया पुच्छिऊण आयरियं । ववहारं ववहरंती ताहे सो तेसि साहेइ ॥ १ ॥
तस्स य भगिणीपुत्तो भोगभिलासीओ मुंचए लिंगं । तो अणुकंपा भणई–किं काहिसि तं विणत्थेण ॥ २ ॥
ता वच्च ते वणिए, भणाहि—अत्थं पयच्छह मज्झम । तेण य गंतु भणिया तो तेसिं बेइ अह एक्को ॥ ३ ॥
कत्तो अत्थो अम्हं किं सउणी रूवए इहं हगई । बीओ चंगेरि भरेवि निग्गउ नउलयाणं तु ॥ ४ ॥
गिण्हसु जावइएहिं कज्जत्ती गहिय तेण जावट्ठो । बिइयंमि हायणंमी किं गिण्हामो त्ति ते बिंति ॥ ५ ॥
भणिओ सउणी इत्तो तणकट्ठं वत्थरूयकप्पासे । नेहगुलधन्नमाई अन्तो नयरस्स ठावेहि ॥ ६ ॥
बिइउ य तेहिं भणिओ सव्वदाणेण गिण्ह तणकट्ठं । नगरबहि ठावावय गहिएणुवरिं च वासासु ॥ ७ ॥
छइएसुं गेहेसुं पलित्ते दड्ढं तओ उ तं नगरं । तणकट्ठाणं पुंजो अइव महग्घो उ सो जाओ ॥ ८ ॥
दड्ढमियरस्स सव्वं ताहे सो गंतु भणइ आयरियं । उच्छाहिओ अहोहं किं तु न नायं इमं तुब्भे ॥ ९ ॥
किं सउणी य निमित्तं हगं ति अम्हं ति भणइ नेमित्ती । होइ कयावि तहन्नय रूठं नाउं तओ खामे ॥ १० ॥

चूर्णौ भव्वग त्ति भागिनेयः । प्रतिभग्नो व्रतपालनात् । चंगोडगो च्छब्बडयं रूवई भरिय नउलाणं घेत्तूण उवट्ठिओ । तदनु घृतगुडादिपण्यस्य पत्तनान्तर्मध्ये सङ्ग्रहोपदेशं दत्तवान् । द्वितीयस्य रूपकदातुर्वंशतृणकाष्ठादीनां संग्रहं पत्तनात् बहिष्टादुपदिष्टवान् । पत्तनान्तर्दग्धपण्यस्य सम्मुखं ब्रवीति किं शकुनिका निमित्तं हदंते । एवंविधार्थोपादानकारिणः पुरुषस्याभ्युत्थितस्य व्रतग्रहणाय तत्र क्षेत्रे प्रायश्चित्तं दातुं न कल्पते ।

२७—14. **हत्थालम्बो त्ति**—हस्थालंब इव हत्थालंबस्तं ददत् । अशिवपुररोहा(धा)दौ तत्प्रशमनार्थमभिचारुकमंत्रविद्यादि प्रयुञ्जान इत्यर्थः । **हत्थायालो त्ति**—हस्तेन आताडनं हस्तातालस्तं दलमाणे ददत् । यष्टिमुष्टिलगुडादिभिर्मरणादिनिरपेक्ष आत्मनः परस्य वा प्रहरन्निति भावः । तत्र

आयरियस्स विणासे गच्छे अहवावि कुलगणे संघे । पंचेंदियवोरमणं पि काउं नित्थारणं कुज्जा ॥
एवं खु करेंतेणं अव्वोच्छित्ती कया उ तित्थंमि । जयवि सरीरावाओ तहवि य आराहओ सो उ ॥
अन्यस्तु सामर्थ्ये सति आगाढेऽपि प्रयोजने न प्रयुङ्क्ते यः स विराधकः ।

२७—21. **कीरइ०** गाहा [८९] सो य आचार्यादिः । **एत्थ चउभंगो त्ति**—दव्वलिंग-भावलिंगपदद्वयेन भङ्गचतुष्टयं यथा—दव्वलिंगेन रजोहरणादिना अणवट्ठप्पो महाव्रतादिना भावलिङ्गेन च । १ । दव्वलिंगेणाऽण०, न भावलिंगेनेति शून्यः । २ । भावलिङ्गेन अनवट्ठप्पो न दव्वलिंगेण । ३ । भावलिंगेण अणवट्ठप्पो; असंभवि भंगोऽयं । ४ ।

२७—24. सपक्खपरपक्खे प्रदुष्टस्तैन्यादिदोषैः स्तैन्यद्वयं सूचितम् । १ । स्वपक्षपरपक्षघातनोद्यतो निरपेक्षतया अनेन हस्तातालो गृहीतः । हत्थालंबो अत्थादाणो य इत्यनेन तृतीयभङ्गमाह । द्वितीयचतुर्थभङ्गौ असंभविनौ ।

२७—28. **जहा अत्थादाणिओ त्ति**—योऽर्थमुत्पादयति निमित्ता स । **उत्तमट्ठेत्यादि । तत्थेव त्ति**—स्वस्थाने । ओसन्नाइ अन्नयरस्स स्वस्थानत्यागे सति भावलिङ्गं दीयते ।

२७—35. संघाधिक्षेपो जात्यादिना ज्ञेयः ।

२८—4. **सुहसाय त्ति** सुखस्वापाः ।

२८—2. **न जईणं ति**—वच्छला इति योज्यम् ।

२८—7. आशातनया तपोऽनवस्थाप्यः कियता कालेन स्यादित्याह—**जहन्नेणेत्यादि** । एतावत्कालादूर्ध्वं असौ व्रतेषु स्थाप्यते ।

२८—12. **तव [illegible] य त्ति**—तपोऽन्वितः ।

२८—14. **नि[illegible]हणारिहा त्ति**—गच्छात्पृथक्करणार्हः सः । सूत्रे सव्वो वि त्ति पदम् ।

२८—17. आशातना-प्रतिसेवानवस्थाप्यो द्विप्रकारोऽपि मूलार्हं उक्त उत्सर्गतः । अववाएण कुलादि-कार्यकारी । तदधीनानि कार्याणि । उत्तमं कार्यं बहुजनसाध्यं शृङ्गनादितकार्यमुच्यते । तत्प्रसाधितं येन भवति ।

संवासो से कप्पइ त्ति—[मूलसूत्रस्थं वाक्यमिदं]—एकत्र निवसनं गच्छमध्ये तस्य कल्पते । आलपनसंभाषणादीनि । अयमत्र भावार्थः—गाथोक्तवन्दनादि-[illegible]भाषणादिक्रियापरिहारेण न एकत्र संवसनमात्रं मुक्त्वा तपस्य अनवस्थाप्यलक्षणस्य विधिना प्रतिपत्तिः स्वीकारोऽनवस्था[illegible] तपःप्रतिपत्तिः ।

२८—20. तत्प्रतिपत्तौ विधिमाह—पसर[illegible]—परिहारतवं पडिवज्जंतो दव्वाइ अपसत्थे वज्जित्ता पसत्थेसु दव्वाइसु काउस्सग्गो कीरइ। तत्थ दव्वओ वडमाइखीररुक्खे। खेत्तओ इक्खुशालिक्षेत्रकुसुमितवनखंड-प्रदक्षिणावर्तजलपद्मसरश्चैत्यजिनगृहादि। कालओ पुव्वसूरे पसत्थाइदिणेसु य। भावओ चंदताराबलेसु। तत्रापि सन्ध्यागतादिदिनवर्जं आलोचनां प्रयुंक्ते। यत उक्तम्—

‘संझागयं रविगयं विड्डेरं सग्गहं विलंबिं च। राहुहयं गहभिन्नं च वज्जए सत्तनक्खत्ते ॥’

अत्र लोकश्रीटीकाकारव्याख्या—सूर्ययुक्तादनन्तरनक्षत्रं सग्रहणम्। सूर्यास्तगमनकाले यन्नक्षत्रमुदयमुपयाति तद्विलम्बितम्। राहुणा मुखेनाक्रान्तं पुच्छेन वा तद्राहुहतम्। अन्ये त्वाहुः—यस्मिन् नक्षत्रे ग्रहणमासीत्तथावद् रविणा न युक्तं तावत्तद्राहुहतमिति। ग्रहभिन्नं यन्मध्ये ग्रहो विभिद्य निर्गच्छति। केचिच्छकटभेदमेव ग्रहभेद इत्युदाहरन्ति। अन्ये त्वत्रैवं ब्रुवते—यथा—

‘जम्मि रविनक्खत्ते ततो संझागयं तु चउदसमं। विड्डेरं तु विइज्जं होइ चउत्थं विलंबिं च ॥’

अन्यस्त्वाह—‘सर्वविरुद्धे दिवसे यद्येको भवत्यमृतयोगस्तु। हिमवह्निकरकिरणैः सर्वे दोषाः प्रलीयंते ॥’

कालतः प्रतिपत्तिश्चास्य तपसो जहन्नेण मासो उक्कोसेणं छम्मासा। तंमि परिहारतवं पडिवज्जंतो आयरिओ भणइ—अणवट्ठप्पतवस्स निरुवसग्गनिमित्तं ठामि काउस्सग्गं। ‘अन्नत्थूससीएण’मित्यादि कायोत्सर्गदण्डको वाच्यो जाव वोसिरामि। ‘लोगस्सुज्जोयरे’ अणुपेहित्ता, ‘नमो अरहंताणं’ति पारित्ता, ‘लोगस्सुज्जोयरे’ कड्ढित्ता आयरिओ भणाइ—

‘एस तवं पडिवज्जइ न किंचि आलवइ, मा य आलवह। अन्नस्स(ट्ठ)चिंतगस्स उ वाघाओ भे न कायव्वो ॥’

अस्यार्थः—एस अप्पविसुद्धिकारओ परिहारतवं पडिवज्जइ। एस तुब्भे न किंचि आलवइ। तुब्भे वि एयं मा आलवह। एस तुब्भे सुत्तत्थेसु सरीरवद्धमाणीं वा न पुच्छइ। तुब्भे वि एयं मा पुच्छह। एवं च आत्मार्थचिन्तकस्य ध्यानपरिहारक्रियाव्याघातो न कर्तव्यः। वन्दनं कुरुते भवताम्, न चासौ भवद्भिर्वन्द्यः। खेलकाइयसन्नामत्तगं वा न सो देइ। तस्संतिओ वा न घेप्पइ। उवगरणं परोप्परं न पडिलेहंति। संघाडगा परोप्परं न भवंति। भत्तपाणं परोप्परं न करेंति। एगमंडलीए न भुंजंति। यच्चान्यत् किंचित्करणीयं तत्तेन सार्धं न कुर्वन्ति। गीयत्था परिहारिया तस्स गच्छंतस्स सव्वत्थ अणुगच्छंति। पारणकदिने अलेवकडं पारेइ। सयमाणीयं निद्दिट्ठअन्नेण वा। इत्यनवस्थाप(प्य)विधिरुक्ता ॥

२८—27. अधुना पाराञ्चिकमभिधीयते—तत्र पारं तीरं तपसोऽपराधस्याञ्चति गच्छति। ततो वीक्ष्यते यः स एव पाराञ्चिकस्तस्य यदनुष्ठानं तच्च पाराञ्चिकमिति। दशमं प्रायश्चित्तम्। लिङ्गक्षेत्रकालतपोभिर्बहिःकरणमिति भावः। तत्र पाराञ्चिकेत्यादि—इह सूत्रे प्रतिषेधकपाराञ्चिक एव त्रिविध उक्तः। तदुक्तम्—

‘पडिसेवणा पारंची तिविहो सो होइ आणुपुव्वीए। दुट्ठे य १, पमत्ते य २, नायव्वे अन्नमन्ने य ३ ॥’

तत्र दुष्टो दोषवान्—कषायतो विषयतश्च। पुनरेकैको द्विधा—स्वपक्षपरपक्षभेदात्। उक्तं च—

‘दुविहो य होइ दुट्ठो—कसायदुट्ठो य विसयदुट्ठो य। दुविहो कसायदुट्ठो सपक्खपरपक्ख-चउभंगो ॥’

स्वपक्षकषायदुष्टः परपक्षकषायदुष्टः। १। स्वपक्षक०, न परपक्षक०। २। न स्वपक्षदुष्टः, परपक्षदुष्टः। ३। न स्वप०, न परपक्षदुष्टः। ४। चतुर्थः शून्यः।

कोहं करेंतो कसायदुट्ठो। तत्थ सपक्खे कषायदुट्ठस्स इमे सासवनालाई चत्तारि उदाहरणा।

२८—34. तत्थ सासवनाले—सा[स]वा भज्जिया। एगेण साहुणा भिक्खागएण सासवनालसेल्लयं सुसंभृतं लद्धं। तत्थ से अईव गिद्धी। तेण तं गुरुणो उवणीयं। तच्च गुरुणा सव्वं भुत्तं। इयरस्स कोवो जाओ, भंडियं च। गुरुणा सो खामिओ तहा नोवसंतो। भणाइ य-भंजामि ते दंता। गुरुणा चिंतियं—मा एस मं असमाहीए मारिस्सइ त्ति गणे अन्नं आयरियं ठवित्ता अन्नं गणं गंतुं अणसणं पडिवन्नं। पुच्छइ ते साहू कत्थ मे गुरवो। पुच्छति कहिं गओ गुरू। न कहिंति साहवो। सो अन्नओ सोचा गओ जत्थ गुरवो। तेहिं कहियं-अज्ज चेव कालगओ परिट्ठविओ य। ताहे पुच्छइ-कत्थ से सरीरयं गुरुणो। पुव्वकहिओ भंजंतो भणाइ-सासवनालं खाइसि त्ति। एवं करेंतो सिद्धो ॥ १ ॥

मुहणंतए य त्ति—एगेण साहुणा लद्धं मुहणंतगं। आणियं तं गुरुणा गहियं। इत्थ वि सव्वं पुव्वक्खाणगसरिसं। नवरं तं मुहणंतगं पच्चप्पिणंतस्स न गहियं जीवंते गओ राओ। साहुविरहं लभित्ता, गेण्हसि भणंतो, गाढं गले गिण्हइ। संमूढेण गुरुणा वि सो गहिओ। दोवि मया ॥ २ ॥

सिहरिणि त्ति—एगेण साहुणा उक्कोसा मज्झिमया सिहरिणी लद्धा। गुरुणो आलोइया निमंतिया। गुरुणा सव्वं आवीया। से साहू पत्थरं उग्गिरित्ता आगओ। अन्नेहिं वारिओ। तहावि अणुवसंतो। गुरुणा सगणे चेव भत्तं पच्चक्खाणं, नो अन्नं गच्छं गओ ॥ ३ ॥

उल्लुगच्छिओ त्ति—एगो साहू अत्थं गए सूरिए सीवंतो गुरुणा भणिओ–पेच्छसि उल्लुगच्छी। सो रुट्ठो भणइ–एवं भणंतस्स दोवि अच्छीणि ते उद्धरामि। एत्थ वि गुरुणा खामिओ। नोवसंतो भणइ–ते अच्छीणि उद्धरामि। तओ सो रओहरणाओ अयोमयं किलयं कड्ढिऊण दोवि अच्छीणि उद्धरित्तु ठोवेइ ॥ ४ ॥

एए चउरो वि लिंगपारंची। विसयदुट्ठे वि चउभंगो त्ति—यथा सलिंगी सलिंगसाध्वीं सेवते। १। सलिंगी गिहिलिंगीस्त्रीं। २। सलिंगी अन्नलिंगे परिव्राजिकां। ३। अन्नलिंगी अन्नलिंगे। ४। शून्योऽयं। परपक्षकषायदुष्टस्तु राजवधक-उदायिनृपमारकवत्। सपक्षविषयदुष्टस्तु साध्वीकामुकः। स च—

पावाणं पावयरो दिट्ठिब्भासो वि सो न कप्पइ हु। जो जिणमुद्दं समणिं नमिऊण तमेव धरिसेइ ॥

परपक्षविषयदुष्टस्तु—राजग्गमहिष्यधिगन्ता, अमात्ययुवराजसेनापत्याद्यग्रमहिषीसेवकश्च। **दुट्ठे पारंचिए त्ति** व्याख्यातम्।

सम्प्रति **मूढे पारंचिए त्ति** व्याख्यायते **[गाथा ९६]**—स्त्यानर्द्धिनिद्राप्रमादवान् प्रमत्तः मूढोऽपि च एवात्र व्याख्येयः—पञ्चमनिद्रापरो यः अतिसंक्लिष्टपरिणामात् स्त्यानर्द्धिनिद्रोपगतो दिनदृष्टमर्थमुत्थाय प्रसाधयति। **वावारए त्ति**—व्यापारयति। तदुदये च केसवार्धबलसदृशी शक्तिर्भवति प्रथमसंहननिनः। **चूर्णिकृद**प्यग्रे पारांचिकविधौ **पमत्तपारंचिए** इति पाठं दर्शयिष्यति।

२९—१. **पोग्गलेत्यादि**—पोग्गलं-मंसं १. मोदगा–लड्डुया २. दन्ता–हत्थिदंता ३. फरुसगो–कुम्भकारो ४. वडसाला–डाली ५. एते थीणद्धीए उदाहरणा।

तत्थ **पोग्गले** जहा–एगंमि गामे एगो कुटुंबी। पक्काणि य तेलियाणि य तिमण्णेसु य अणेगसो मंसप्पगारा भक्खेइ। सो य तहारूवाणं थेराणं अंतिए धम्मं सोऊण पव्वइओ। विहरइ गामाइसु। तेण य एगत्थगामे मंसत्थिएहिं महिसो विगिंचमाणो दिट्ठो। तस्स मंसे अभिलासो जाओ। सो तेण अभिलासेण अव्वोच्छिन्नेण भुत्तो। एवं अवच्छिन्नेण वियारभूमिं गओ। चरिमा सुत्तपोरुसी कया। पाउसीयावस्सया कया। तदभिलासी चेव सुत्तो। सुत्तस्सेव थीणद्धी जाया। सो उट्ठिओ गओ महिसमंडलं। अन्नं हंतुं भक्खियं सेसं आगंतुं उवस्सयस्सोवरि ठवियं। पच्चसे गुरूण आलोएइ—एरिसो सुविणो दिट्ठो। साहूहिं दिसावलोयं करिंतेहिं दिट्ठं कुणिमं। जहा एस थीणद्धी। थीणद्धिस्स लिंगपारंचियं पायच्छित्तं। तं से दिन्नं ॥ १ ॥

मोयगे त्ति—एको साहू भिक्खं हिंडंतो मोयगभत्तं पासइ। सुचिरं उविक्खियं न लद्धं। गओ जाव तदज्झवसिओ सुत्तो। उप्पन्ना थीणद्धी। राओ तं गिहं गंतुं भंतूण तं कवाडं मोयगे भक्खयति। सेसे पडिग्गहे घेत्तुमागओ। वियडणं। चरिमाए भायणाणि पडिलेहंतेण दिट्ठा। एयस्स लिंगपारंचियं ॥ २ ॥

दंते त्ति—एगो साहू गोपुरनिग्गओ हत्थिणा पक्खित्तो कहवि पलाओ। रुसिओ चेव पसुत्तो। उदिन्ना थीणद्धी। उट्ठिउं गओ, पुरकवाडे भंतूण गजो वावाइओ। दंतमुसले गहेऊणमुवागओ। उवस्सयबाहिं ठवित्ता पुणरवि पासुत्तो। पभाए उट्ठिओ सुविणं आलोएइ। साहूणं गयदंतदरिसणं नायं। तहेव विसज्जिओ ॥ ३ ॥

फरुसग त्ति—एगंमि महंते गच्छे कुम्भकारो पव्वइओ। तस्स राओ सुत्तस्स थीणद्धी उद्धा। सो य मट्टीच्छेयब्भासा समीवत्थाण साहूण सिराणि छिंदिउमारद्धो। ताणि सिराणि कलेवराणि य एगंते पडइ। सेसा ओसरीया। पुणरवि पासुत्तो। सुविणमालोयणं। पभाए साहुसंभारणं नायं। दिन्नं च से लिंगपारंचियं ॥ ४ ॥

च ...जणं ति—एगो साहू भिक्खायरिउं गओ। तत्थ पहे वडसाला रुक्खो। तस्स साला पहं विभेण कंपेउं गओ। सो य साहू उम्हाभिहयमालो भरियभायणो तिसयभुक्खंतो ...रियोवउत्ता वेगेण आग...माणो ताए सालखंधाए सिरेण फिडिओ। रुसिओ जाव पासुत्तो। थीणद्धी उदिया। उट्ठिओ गओ। गंतूण तं सालं गहे॰ रूपमागओ। उवस्सय बारे ठविया। वियडणा। नायं थीणद्धी। लिंगपारंची कओ॥ ५॥

केइ आयरिया भणंति—सो पुव्वं वणहत्थी आसी। तओ मणुयभवमागयस्स थीणद्धी जाया। पुव्वब्भासा गंतूण वडसाला भंजणाणयं। सेसं तहेव। इह स्त्यानर्ध्या प्रथमसंहननिनः ...र्द्धबलसदृशी शक्तिर्भवति। तदन्यत्र सामयिका दुगुणं तिगुणं चउगुणं वा भणति।

अन्नन्नं ...राधे त्ति—सूत्रपदस्य व्याख्या—अन्योऽन्यं परस्परं मुखपायुप्रयोगतो मैथुनं कुर्वन् पुरुषयुगमिति विशेषः। अभ्य (भण्य ?) ते च—'आसयपोसयसेवी केवि मणूसा दुवेयगा हुंति।'

तेसिं लिंगविवेगो त्ति—तीर्थंकराद्यासातनापरा आसातनापारंची भवति।

चरिम ...भावसिसु त्ति [गाथा ९६]—चरिमट्ठाणं पारंचियमेव। तस्यापत्तयस्तदतिचारसेवनानि तेषु प्रसज्यते, स च पाराञ्चिकार्हः।

२९—13. **दव्वभावलिंगे चउभंगो त्ति**—द्रव्यलिङ्गं रजोहरणादि, भावलिंगं महाव्रतादि। दव्वलिंगेण पारंचिओ, भावलिंगेण य १. दव्वलिंगेण पारं॰, न भावलिंगेण य २. भावलिंगेण पारं॰, न दव्वलिंगेण ३. न दव्वलिंगेण पारं॰ न भावलिंगेण य ४. इति। चतुर्थः शून्यः। अग्रमहिष्यादिसेवनादौ संप्रकटसेवी।

२९—14. **उभयलिंगेण वि त्ति**—द्रव्यलिंगेन भावलिंगेन च पाराञ्चिको भवति।

२९—15. **अत्थु॰ गाहा [९९]** दोसो व्रतलोपादिकः॥ क्षेत्राण्येवाह—**वसहीए**त्यादि—वसही–वसतिः निवेसनं एकनिष्क्रमणप्रवेशानि व्यादीनि गृहाणि। पाटको ग्रामादेर्व्यवच्छिन्नः सन्निवेशः। साही ग्रामगृहाणामेकपाटी। नियोगो राजकृतपुरदेशः, राज्यादिकः प्रवेशः, इत्येवंप्रकारक्षेत्रे यस्य यो दोषः सम्पन्नस्तस्मात् क्षेत्रात् स पाराञ्चिकः क्रियेत्।

२९—23. **अणमणं ति**—...नम्।

२९—28. सूत्रार्थपौरुषी द्वे अपि शिष्येभ्यो दत्त्वा गुरुस्तस्य समीपे गच्छति।

२९—31. आचार्यप्रेषितस्य चाग्गीतार्थस्य जत्थ गओ त्ति गव्यूतद्वयस्थितपाराञ्चिकान्तिके। **अंतरालेव त्ति** तत्सकाशा ...गच्छतः। **से** त्ति सूरिशिष्यस्य वा भक्तं पानं च उपनयन्ति साधवः।

२९—35. **अणव...प्पा॰ गाहा [१०२]** परिहारतवो गिम्हसिसिरवासासु जहन्नमज्झिमुक्कोसो–गिम्हे चउत्थछट्ठट्ठमाइं, सिसिरे छट्ठट्ठमदसमाइं, वासासु अट्ठमदसमबारसंताइं; पारणए अलेवकडं। एवं तपःपाराञ्चिकोऽपि। अतो अभिहितं–**अणवट्ठप्पो तवसा तवपारंचिया दोवि वोच्छिन्न त्ति।** लिंगक्षेत्रकालैरनवस्थाप्य-पाराञ्चिकास्तीर्थं यावदनुज्ञाताः।

'**उद्देसऽज्झयण...**' इत्यादि [२३] गाथात आरभ्य '...लिज्जइ सुबहुं पि हु' इति इति [७९] पर्यन्तगाथां यावत् सप्तपञ्चाशत्गाथाभिर्ज्ञानातिचार [दर्शनातिचार] चारित्रातिचारवस्तुत्रयगोचरं तवारिहं पायच्छित्तं भणियं। तदूर्ध्वं गाथात्रयेण च्छेदार्हं। तदनु गाथाचतुष्टयेन मूलार्हं। तदनु गाथासप्तकेनाऽनवस्थाप्यार्हं। तदनु गाथानवकेन पारांचिकमुक्तमिति शास्त्रसमुदायार्थः।

३०—1. अथ शास्त्रसमाप्त्यर्थमुपसंहारगाथामाह–**इय एस॰ गाहा [१०३]** क्रियते अभिधीयतेऽर्थोऽनेनेति करणः शब्दः।

...यकप्पो त्ति—... पूर्वकालचरणा वा जीतं, तस्य कल्पः। कल्पशब्दो वर्णनायामत्र। यतः पठ्यते—

'सामर्थ्ये वर्णनायां च छेदने करणे तथा। औपम्ये चाधिवासे च कल्पशब्दं विदुर्बुधाः॥'

सामर्थ्येऽतो वर्धते कल्पशब्दस्तदर्थेषु निष्पन्नत्वात् । वर्णनायां यथात्र । यद्वा कल्पितो वर्णितः कथितः । छेदने कल्पितं छेदितं वस्त्रम् । करणे ब्राह्मणार्थं कल्पिताः कृताः पूपाः । औपम्ये यथा—समुद्रकल्पमिदं तडागम् । अधिवासे यथा—कल्पिता अधिवासिता स्नानाय सज्जिता प्रतिमा । एतेष्वर्थेषु कल्पशब्दः ।

१०—4. परिणामगा—उत्सर्गापवादवेदिनः । कडजोगिणो—चउत्थाइ तवे कयजोगा । संगह-सीला—वस्त्रपात्रशिष्यादिसङ्ग्रहपराः । अभ्युत्थानाः अखेदवन्त अङ्गोपाङ्गादिश्रुतार्थवेदिनः । बुद्धिवन्तो—मे-धाविनः । एवमादीनि—आदिशब्दात्परिणताः श्रुतेन वयसा च । तत्र सोलवरिसारेण वयसाऽव्वत्तो, परेण वत्तो । श्रुतेन च अधीतनिषीथो व्यक्तः, शेषस्तदन्यः । तथा तरमाणगा—जे जं तवोकम्मं आढवेति तं नित्थरंति तदन्ये तरमाणा इत्यादि ग्राह्यम् ।

१०—20. पावणं त्ति—पवित्रम् । निश्चितसूत्रार्थदर्शनज्ञाना अमलचरणश्च, तम् ।

॥ इति जीतकल्पचूर्णिविषया [विषमपद—] व्याख्या समाप्ता ॥

जीतकल्पबृहच्चूर्णौ व्याख्या शास्त्रानुसारतः ।
श्रीचन्द्रसूरिभिर्दृब्धा स्वपरोपकृतिहेतवे ॥ १ ॥
मुनि-नयन-तरणि (१२२७) वर्षे श्रीवीरजिनस्य जन्मकल्याणे ।
प्रकृतग्रन्थकृतिरियं निष्पत्तिमवाप रविवारे ॥ २ ॥
संघचैत्यगुरूणां च सर्वार्थप्रविधायिनः ।
वशा (विशो ?) ऽभयकुमारस्य वसतौ दृब्धा सुबोधकृत् ॥ ३ ॥
एकादशशतविंशत्यधिकश्लोकप्रमाण (११२०) ग्रंथाग्रं ।
ग्रंथकृतिः प्रविवाच्या मुनिपुंगवसूरिभिः सततम् ॥ ४ ॥
यदिहोत्सूत्रं किञ्चिद् दृब्धं अज्ञानभावनया ।
तन्मयि कृपानुकलितैः शोध्यं गीतार्थविद्वद्भिः ॥ ५ ॥

॥ समाप्ता चेयं श्रीशीलभद्रप्रभुश्रीधनेश्वरसूरिपादपद्मचंचरीक
श्री श्री चंद्रसूरिसंरचिता जीतबृहच्चूर्णिदुर्गपदविषया
निशीथादिशास्त्रानुसारतः संप्रदायाच
सुगमा व्याख्येति ॥

यावल्लवणसमुद्रो यावन्नक्षत्रमंडितो मेरुः ।
खे यावच्चन्द्रार्कौ तावदियं वाच्यतां भव्यैः ॥

परिशिष्टः ।

पृष्ठ ५२ उपरि सूचितं (२४-14) जीतकल्पयन्त्रः ।

निरपेक्ष	आचा०कृत	आचा० अकृत	उपा० कृत	उपा० अकृत	गी० स्थि० कृत	गी० स्थि० अकृत	गी० अस्थि० कृत	गी० अस्थि० अकृत	अगी० स्थि० कृत	अगी० स्थि० अकृत	अगी० अस्थि० कृत	अगी० अस्थि० अकृत
०	पारांचिकं	अनवस्था०	अनवस्था०	मूलं	मूलं	छेदः	छेदः	६।	६।	६	६	४।
०	अनवस्था०	मूलं	मूलं	छेदः	छेदः	६।	६।	६	६	४।	४।	४
मूलं	मूलं	छेदः	छेदः	६।	६।	६	६	४।	४।	४	४	०
छेदः	छेदः	६।	६।	६	६	४।	४।	४	४	०	०	०
६।	६।	६	६	४।	४।	४	४	०	०	०	०	२५
६	६	४।	४।	४	४	०	०	०	०	२५	२५	२०
४।	४।	४	४	०	०	०	०	२५	२५	२०	२०	१५
४	४	०	०	०	०	२५	२५	२०	२०	१५	१५	१०
०	०	०	०	२५	२५	२०	२०	१५	१५	१०	१०	५
०	०	२५	२५	२०	२०	१५	१५	१०	१०	५		
२५	२५	२०	२०	१५	१५	१०	१०	५				
२०	२०	१५	१५	१०	१०	५						
१५	१५	१०	१०	५								
१०	१०	५										
५												

मुनि जिनविजय–सम्पादित ग्रन्थावली

१ जैनतत्त्वसार–हिन्दी भाषांतर.

२ विज्ञप्तित्रिवेणि–संस्कृत हिंदी.

३ कृपारसकोष–संस्कृत हिंदी.

४ शत्रुंजयतीर्थोद्धार प्रबंध–संस्कृत हिंदी.

५ द्रौपदीस्वयंवर नाटक–संस्कृत हिंदी.

६ प्राचीन जैनलेखसंग्रह भाग १. संस्कृत गूजराती.

७ ,, ,, भाग २. ,, ,,

८ जैन ऐतिहासिक गूर्जरकाव्य संचय–गूजराती.

९ हरिभद्राचार्यस्य समयनिर्णयः–(संस्कृतनिबन्धः)

१० कुमारपालप्रतिबोधः–(गायकवाडस् ओरिएन्टल सीरीज.)

११ प्राकृतकथासंग्रहः–(गूजरात पुरातत्त्व मन्दिर ग्रंथावली.)

१२ पालीपाठावली. ,, ,, ,, ,,

१३ अभिधानप्पदीपिका–पालीशब्दकोष. ,, ,,

१४ जैनसाहित्यसंशोधक त्रैमासिक पत्र. खंड १–२.

छपाता ग्रन्थो

१५ प्राचीन गूजराती गद्यसन्दर्भ.

१६ पट्टावलीसंग्रहः

१७ विजयदेवमाहात्म्य.

१८ गूजरातनां इतिहासनां साधनो.